Late Shree Vithaldas Thakordas Choksi

Birth : 1891 × **Death : 1930**

सुबोध-संस्कृतम् ।

SUBODH SANSKRIT

(प्रथमो – द्वितीयो भागः)

First and Second Parts

रचयिता – Author

Shree Rasiklal A. Parikh

M. A. B. Ed.

Translator – भाषांतरकर्ता

Shree Bhupendra V. Dave

B. A.

(Scholar of Sanskrit and Western languages.)

BHARTIYA VIDYA MANDAL, SURAT.

– Publisher –

Secretary, Bipinchandra G. Dalal
Bhartiya Vidya Mandal,
Balajee Road, Surat-1.
(Gujarat – India)

First English Edition – 2000 Copies – (1973)

Price for First Part Rs. 1-00

Price for Second Part Rs. 1-25

Price for First and Second Parts
(Combined) Rs. 2-00

– Printers –

Dahyabhai Kalidas Modi
Aroon Printing Press,
Begumpura, Surat.

Glimpses of the Donor's Life

The generous philanthropist Shree Vithaldas Thakordas Choksi has fulfilled the misson of his life by granting huge charity and donations to various institutions and by offering Rs. five lakhs for establishing Gurukul in Surat, for the propogation and elevation of sanskrit studies which is the very life-breath of ancient and modern India. In a comparatively short life of 39 years he attained the status of an Opulent Philanthropic hero beginning his career with an humble service in a Marwari firm. None who approached him with a request of donation was ever disappointed. He used to rule the silver and gold bullion markets. If anything that continued to flow in his life uniformly it was good conduct, charity and wealth.

He was born in a poor Vaishnava family in 1891. Seeds of religious faith were sown deep in his heart as his mother was a devout and a pious woman. His life was full of restraint, devoid of addiction, good conduct. He had an inexhaustible faith in religious rites and on learned men. So he lavished charities on a number of religious and educational institutions. He had visited nearly all the sacred shrines of pilgrimage of India. He was initiated to Diksha in Puri (near Calcutta) at the age of 33 years from the saint Vasudevacharya of the Ramanuja sect and he had built a monestary there for ascetics. He had donated huge charities to numerous institutions of our country like the Shantiniketan of Ravindranath Tagore, the Arvindashrama in Pondichari, the Hindu University in Varansi and to places like the Gurukuls of Jains in the Punjab. He as well as his Charity Trust have donated liberally in every

way in his birth place at Surat, for establishing a Guaukul and dining house for poor men of the Bania Community, a leprosy hospital in the name of his mother Parvatibai, Shrimannarayana dispensary and also to the Tapi Brahmcharya Ashram, a grazing land for cows.

In recent years the Chief Trustee Shree Mangaldas K. Choksey of the said Trust with the advice of the sympathiser of the Trust Shree Mohanlal B. Modi donated profusely for the Sarvajanik Law College and to the Haripura Sarvajanik High School along with its commerce section (including the trust's Building and land etc. costing Rs. 10 lakhs.)§ Sarvajanik B. Ed. College (Rs. 100000) and for its central Hall (Rs. 40000), Bhartiya Vidya Mandal, (Rs. 50000) on the whole), Sanatan Dharma Seva Sangha (Rs. 50000), Suryapura Sanskrit Pathshala, Chunilal Gandhi Vidya Bhavan (Rs. 47500), Gurukul Vidya Peeth at Katargam (Rs. 50000), for Girls' High School, Jeevan Bharti (Rs. 60000) etc.

The charities of the deceased were not meant for achieving fame as philanthropist, but his heart and his life were full of compassion as well as religious ideas. Hence it became natural for him to be a hero in liberal and charitable acts. This saintly person who was a hero in charity and who by his deeds decorated the life of a householder died and went to heaven in the month of Nov. 1930 at the age of 39. In the short duration of such a life few persons can achieve welfare (प्रेयस्) and attain their cherished spiritual aim (श्रेयस्) by living a noble and crystal pure life.

To-day the main Trustee of the said Trust, Shree Mangaldas K. Choksey (the colleague of the deceased donor)

freely help the institutions for propagating the Sanskrit language in Surat and other establishments of general education from his trust, for which Bhartiya Vidya Mandal of Surat is also very much grateful to him. It is a great pleasure that in memory of the deceased, Bhartiya Vidya Mandal of Surat publishes this English Edition of Subodh Sanskrit Parts, first and second, in a simple and lucid style for the spread of the study of Sanskrit literature in India as well as in foreign countries with the kind help of the said Trust.

PREFACE

It is a great pleasure to us to present to our readers and students this English Edition of the two parts of Subodh Sanskrit written in Gujarati originally by Shree Rasiklal A. Parikh and translated by Shree Bhupendra V. Dave and the said author of the book for which we are thankful to them. We are also grateful to Shree Nruhsinh ram H. Upadhyay and Shree Ganeshchandra D. Dave and to I. N. Gujjar (for illustrations) for helping us in publishing these parts of the book. We hope that these publications will be useful to all people desiring to obtain a good knowledge of Sanskrit and in creating eagernerss to learn the language in the minds of all.

The above parts of the book are written following the modern direct method in a lucid and simple style along with illustrations and pictures. Vocabulary consisting of each and every sanskrit word with its meaning and a detailed grammatical explanation are also given in each lesson. Prose lessons, subhashitas, selected verses from the Geeta and separate chapters on sandhis and synonyms are also given. Thus this First Book will be *the most useful and interesting to the students, teachers and foreigners.* The first two parts are recognised by the *Director of Education of Gujarat State for Library purposes.* The Second Book consisting of the third and fourth parts of the book in English will be published later on. At last we beg to state that we are also greatly indebted to the sympathy which the Trustee of the V. T. Trust have shown in the preparation and publication of these two small volumes by helping us.

Secretary,

Bhartiya Vidya Mandal, Surat

INDEX OF CONTENTS

शरीरस्यावयवाः ।

केशाः
ललाटम्
शीर्षम्
नेत्रम्
कर्णः
नासिका
कपोलः
कण्ठः
ओष्ठः
चिबुकम
स्कन्धः
उरः
हस्तः
बाहुः
उदरम्
मणिबन्धः
अङ्गुष्ठः
करतल
अङ्गुलिः
ऊरूः
पादः
चरणः
नखम्

सुबोध-संस्कृतम् ।

(प्रथमो भागः)

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥

I bow to the lotus like feet of Ganesh (the son of Lord Shiva), who is expert in removing the obstacles whose face is like that of an elephant, who is served by the mass of the Bhutas (the attendants of Lord Shiva), who is fond of eating the wood-apples and rose-apples delightfully, the son of Pārvati, the root cause of removing the grief (of the wordly affairs).

१. वर्ण-परिचयः ।

(Acquaintance with letters)

Sanskrit is the sacred language as well as the language of the learned people of India. It is also called a refined language of the cultured people like Āryans. The meaning of the word 'संस्कृत' is cultured. It is commonly written in Devanagari script. (दिव् to shine, those of a brilliant complexion).

The correct name of the Sanskrit script is Devanāgari (देवनागरी), sometimes abbreviated into Nagari. The letters of the Devnāgari script are mainly divided into vowels (स्वर) and consonants (व्यंजन). There are thirteen vowels and thirty-three consonants.

(1) Vowels are of three kinds viz, Short (ह्रस्व) Long (दीर्घ) and protracted (प्लुत). They are divided according to the time required to pronounce.

(a) Short vowels :—(ह्रस्व) अ a, इ i, उ u, ऋ ṛi, ऌ lṛi.

(b) Long vowels :—(दीर्घ) आ ā, ई ī, ऊ ū, ॠ ṝi, ए e, ऐ ai, ओ o, औ au.

(c) Protracted vowels :—(प्लुत) आ ३ ā 3, ई ३ ī 3, ऊ ३ ū 3, ऋ ३ ṛī 3, ऌ ३ lṛi 3, and other four vowels (ए, ऐ, ओ and औ).

(अ) The crowing (ऊकालोऽज्झ्रस्वदीर्घप्लुतः) of the cock in the morning into three stages represents these three kinds of vowels. The time required to pronounce a short vowel is called a matra (मात्रा). In this way a long vowel requires two matras and pluta vowel three. (Pluta vowel is used only in the vedas not in the classical literature. So they are not useful here).

(2) Consonants (व्यंजनानि)

क - वर्ग (Class)	क् k	ख् kh	ग् g	घ् gh	ङ् ṅ
च - ,, ,,	च् ch	छ् chh	ज् j	झ् jh	ञ् ñ
ट - ,, ,,	ट t̤	ठ् ṭh	ड् ḍ	ढ् ḍh	ण् ṇ
त - ,, ,,	त् t	थ् th	द् d	ध् dh	न् n
प - ,, ,,	प् p	फ् ph	ब् b	भ् bh	म् m
अन्तःस्थ - Semi-vowels	य् y	र् r	ल् l	व् v	अनुनासिक nasals
ऊष्माक्षर - Sibilants	श् sh	ष् ṣh	स् s		
महाप्राण - Aspirate	ह् h				

Grammarians call the letters from क् to ह् consonants (see above). First twenty five of those consonants are divided into five classes containing five consonants and are called क class, च class, ट class, त class, प class. These consonants are called classified (वर्गीय) consonants of complete touch of the tounge (स्पर्श-mute) consonants य्, र्, ल्, व्, are called semi-vowels corresponding to simple vowels. श् ष् स् ह are sibilants, ङ् ञ् ण् न् and म् are nasals.

(3) Vowels can be pronounced alone, consonants need a vowel to be pronounced. Short अ is added to consonant for pronouncing it and it is to be known by the removal of the nether stroke e. g. क ख ग घ etc. and क्, ख्, ग्, घ्, are called consonants. The other vowels when following a consonant of the same sentence or verse, are denoted thus :—

ā i ī u ū ṛi ṛī ḷri e ai o au

by ा ि ी ु ू ृ ॄ ॢ े ै ो ौ

e. y. का कि की कु कू कृ कॄ क्लृ के कै को कौ

i. e. kā ki kī ku kū kṛi kṛī kḷri ke kai ko kau

(4) Besides these there are two nasal sounds the one is called अनुस्वार (Anuswára) is denoted by (ं) i. e. a dot placed above the letter after which it is to

be pronounced e. g. (अंश amsha); the other is called (अनुनासिक) Anunasika is denoted by (ँ) i. e. a dot within a semi circle placed above the letter after which it is to be pronounced e. g. सँ, अँ and one sign for a hard aspirate called a visarga (विसर्ग) denoted by two vertical dots placed after the letter after which it is pronounced. (कः). In pronounciation it is a harder aspirate than ह. It is not an original character but only a substitute for a final स् s or र् r (e. g. अश्वः).

अनुस्वार :—अं, इं, कं, खं, चं ।

अनुनासिक :—अँ, इँ, उँ, कँ, चँ ।

विसर्ग :—अः, इः, उः, कः, रः, पः ।

---

२. संयुक्तवर्ण-परिचयः ।

(Conjunct consonants)

When consonants devoid of vowels (क्, ख्, ग्, घ् etc.) are joined with other consonants they are styled conjunct consonants. In compounding consonants they should be taken in the order in which they are pronounced; the last consonant takes a vowel, the preceding ones generally losing their nether and perpendicular strokes when combined. Examples :—

(1) च् + य = च्य (ch - ya), प् + त = प्त (p - ta), श् + व = श्व (sh - va).

(2) म् + न = म्न (m – na) (निम्न), न् + त = न्त (n – ta) (शान्त), थ् + य = थ्य (th – ya) (मिथ्या), ब् + ध् = ब्ध (b – dha) (आरब्ध).

(3) क् + त = क्त (k – ta) (सूक्ति), प् + र = प्र (p – ra) (प्रारब्ध).

(4) ङ् + क = ङ्क (ṅ – k) (अहङ्कार), द् + व = द्व (d – va) (विद्वान्).

(5) ट् + ट = ट्ट (ṭ – ṭa), ठ् + य = ठ्य (ṭh – ya), ठ् + र = ठ्र (ṭh – ra), ड् + घ = ड्घ (ḍ – gha), ढ् + य = ढ्य (ḍh – ya), ढ्र = (ḍh – ra)

(6) When the consonant r (र्) immediately precedes another consonant or the vowel ऋ (ri) it is denoted by the sign ˋ (रेफ) (ref), placed above the letter or combination of letters before which it is pronounced e. g. भार्या etc.

र् + म = र्म (rm) (मर्म), र् + य = र्य (rya) (कार्य), र् + ष् + ण् + य = र्ष्ण्य (कार्ष्ण्य) – आर्येण

(7) When (र) follows another consonant without the intervention of a vowel, it is denoted by the slanting stroke placed under the consonant after which it is pronounced.

क् + र = क्र (k – ra) (चक्र), म् + र = म्र (आम्र), ह + र = ह्र (ह्रास).

(8) There are some consonants which combined with others assume all together a new form or change its form.

क् + ष् = क्ष (k - ṣha) (अक्ष), त् + र = त्र (t - ra) (त्रास), ज् + ञ् = (jñ) (ज्ञान), श् र = श्र (shṛa) (श्री), त् + त = त्त (tta) (दत्त), श् + व = श्व (s - hva) (अश्व), द् + म = द्म - (dm) (पद्म), द् + य = द्य (विद्या), ह् + म = ह्म - (hm) (ब्राह्मण), ह् + य = ह्य (h - ya) (बाह्य), श् + च = च (sh - ch) (आश्चर्य) - (आश्चर्य), श श् - श् - these are the three forms of writing (sh).

We can have many such instances.

(9) The numeral figures are :—

१	२	३	४	५	६	७	८	९	०
1	2	3	4	5	6	7	8	9	0

(10) The sign S called Avagraha (i. e. separation, mark of separation) is in many texts employed to indicate the elision of (short) अ following ए e or ओ o, e. g. तेऽभवन् te'bhavan सिंहोऽस्ति simho'sti.

---

३. शब्द-परिचयः ।

(Words - a study)

(अ) प्राणि-वर्गः ।

(अ) प्राणि-वर्गः ।

(ब) पक्षि-वर्गः ।

पुरुष–वचन–परिचयः ।

Person and Numer—a Study.

A subject in a sentence has three persons.

According to classical Sanskrit Grammar :

उत्तम–पुरुषः ।	मध्यम–पुरुषः ।	प्रथम–पुरुषः ।
First Person	Second Person	Third Person
अहम् (I)	त्वम् (Thou)	सः (He), सा (She).

Following modern current gramatical usage they are as mentioned below :—

प्रथमः पुरुषः ।	द्वितीयः पुरुषः ।	तृतीयः पुरुषः ।
Fisrt Person	Second Person	Third Person
अहम् (I)	त्वम् (Thou)	सः (He), सा (She)

When two converse with each other, the speaker uses "I", It is called the 1st. Person. He to whom he talks is addressed as "Thou" and it is called the 2nd Person. The individual or the object about which he speaks is called "He" and this is known as the 3rd Person.

Rama said, "Oh Lakshman." Thou hearest what I Say. I remember Bharat very much. In this speech 'I' is the first 1st. Person, 'Thou' is the 2nd. Person and Bharat about whom he speaks is the 3rd Person.

Numbers :—Every Person has got three common numbers :—

पुरुषः Person	एकवचन Singular	द्विवचन Dual	बहुवचन Plural
प्रथम-पुरुषः । 1st. Person	अहम् (I)	आवाम् We Two	वयम् We all
द्वितीय-पुरुषः 2nd Person	त्वम् (Thou)	युवाम् (You to)	यूयम् (You all)
तृतिय-पुरुषः Third Person	सः (He)-सा (she)	तौ-ते (They Two)	ते-ताः (They)

The Persons and numbers of any verb are according to the subjects. Hence a verb has three Persons and three numbers.

Terminations of the Present Tense
वर्तमानकालिकाः प्रत्ययाः ।

पुरुष	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. पु.	मि	वस् (वः)	मस् (मः)
द्वि. पु,	सि	थस् (थः)	थ ।
त. पु.	ति	तस् (तः)	अन्ति ।

पुरुष	ए. व. Singuler	द्वि. व. Dual	ब. व. Plural
प्र. पु. 1st. P.	अहम् पठामि । I learn	आवाम् पठावः । We two learn	वयम् पठामः । We learn
द्वि पु. 2nd P.	त्वम् पठसि । Thou learnest	युवाम् पठथः । You two learn	यूयम् पठथ । You learn
तृ. पु. 3rd P.	सः पठति । He learns	तौ पठतः । They two learn	ते पठन्ति । They learn

५. लिङ्गवचन–परिचयः ।

Gender and number–a Study.

श्रीगणेशाय नमः।

प्रथमः पाठः। – (First) Lesson

प्रथमः पुरुषः – (First Person)

एकवचनम्-(Singular)-अहम्।

अहम् धावामि।
अहम् खादामि।
अहम् क्रीडामि।
अहम् वदामि।
अहम् चरामि।

अहम् नमामि।

अहम् (सुरेशः) धावामि।
अहम् (सुभद्रा) खादामि।
अहम् (स्वयम्) एव लिखामि।
अहम् अपि तत्र चरामि।
अहम् न धावामि।
जहम् न क्रीडामि।
अहम् न वदामि।
अहम् न लिखामि।
अहम् न खादामि।

अहम् पठामि।

Vocabulary—(शब्दकोशः)

अहम्-(Pro.)-I, मैं
नम्-(I. P.) to bow. नमन करना
पठ्-(I. P) to learn पढ़ना
लिख्-(6. P.) to write, लिखना
पा (पिब्) (I. P.) to drink पीना
धाव्-(I. P.) to run, दौड़ना
खाद्-(I. P.) to eat, खाना
क्रीड्-(I. P.) to play, खेलना
चर्-(I. P.) to walk, घूमना
पच्-(I. P.) to cook, पकाना
वद्-(I. P.) to speak बोलना
अपि-(Ind.) but, किंतु
न (Ind.) not, नहीं
स्वयम् (Ind.) my self, स्वयम्

Exercise - (अभ्यासः)

Writing-(लेखनम्) :—

(A) Following the construction of the Sentence 'अहम् लिखामि'-(I write) write the verbal form of each of the verbs mentioned below and show its meaning.

क्रीड्, पठ्, धाव्, चर्, वद्।

(B) Make a aentence from the verbs given below according to the example shown here.

'अहम् पठामि' पा (पिब्), पठ्, नम्, खाद्, पच्

Note:—In Sanskrit there are ten conjugations or गणs of all the verbs and they are divided into two classes viz. Parasmaipada (परस्मैपद) and Atmanepade (आत्मनेपद). Some verbs, particularly of the tenth conjugation, belong to both classes and they are called Ubhayapade (उभयपद.) P.—Parsomaipada, A.—Atamanepada, U.—Ubhayapade. Ind.—(अव्यय) Indeclinable—(It is not declined according to the terminations of the cases of nouns.)

First we have to learn First, Fourth, Sixth and tenth conjugations.

द्वितीयः पाठः ।–Second Lesson

प्रथमः पुरुषः । First Person

द्विवचनम्–Dual–(आवाम्)

आवाम् प्रातः पठावः ।

आवाम् बहिः भ्रमावः ।

आवाम् अधुना लिखावः ।

आवाम् सायं क्रीडावः ।

आवाम् अपि पिबावः ।

आवाम् नमावः ।

आवाम् (अहम् पीयूषः प्रफुल्लः च) गच्छावः ।

आवाम् (अहम् सुलेखा, सुरेखा च) हसावः ।

आवाम् (अहम् रमणः रमेशः च) धावावः ।

आवाम् पठावः ।

आवाम् स्वयम् एव लिखावः ।

आवाम् अपि तत्र भ्रमावः ।

Vocabulary—(शब्दकोशः)

भ्रम्-(I. P.) to wander फिरना	तत्र-(Ind.) there, वहाँ
हस्-(I. P.) to laugh, हँसना	अत्र-(Ind.) here, यहाँ
चल्-(I. P.) to walk, चलना	अधुना-(Ind.) now, अब
गम्-(I. P. गच्छ्) to go, जाना	उच्चैः-(Ind.) loudly

Note:—Some verbs like गम्. पा, घ्रा take other forms like गच्छ्, पिब् and जिघ्र् respectively at the time of declension.

Exercise – (अभ्यासः)

Writing – लेखनम् :—

(A) आवाम् लिखावः। 'We two write' following the above example write down the forms and meaning of the verbs given below.

हस्, वद्, क्रीड्, धाव्, पा – (पिब्)

(B) Fill up the blank spaces by suitable forms of the verbs and pronous.

आवाम् ————	———— पठावः।
अहम् ————	———— खादामि।
आवाम् ————	———— लिखामि।
अहम् ————	———— क्रीडावः।

तृतीयः पाठः। (Third Lesson)

प्रथमः पुरुषः। (First Person)

बहुवचनम् – Plural – वयम्

वयम् अपि धावामः ।

वयम् प्रातः पठामः ।

वयम् बहिः भ्रमामः ।

वयम् अधुना खादामः ।

वयम् सायं क्रीडामः ।

वयम् नमामः ।

वयम् (अहम् पीयूषः प्रफुल्लः प्रदीपः च) पठामः ।

वयम् (अहम् सुलेखा सुरेखा सुषमा च) भ्रमामः ।

वयम् (अहम् रमेशः रमणः राजीवः च) धावामः ।

वम्य पठामः ।

वयम् स्वयम् एव लिखामः ।

वयम् अत्रापि खादामः ।

वयम् उच्चैः पठामः ।

वयम् शनैः अटामः ।

वयम् शीघ्रम् गच्छामः ।

वयम् तत्र न गच्छामः ।

वयम् अधुना न क्रीडामः ।

वयम् अपि न लिखामः ।

वयम् अत्र न अटामः ।

वयम् शनैः न धावामः ।

Vocabulary-शब्दकोशः ।

वयम्-(Pro.) we, हम.
अट्-(I. P.) to wander, भ्रमण करना
प्रातः-(Ind.) morning सुबह
सायम्-(Ind.) evening शामको

शीघ्रम्-(Ind.) a quickly जल्दीसे
शनैः-(Ind.) slowly, धीरे
बहिः-(Ind.) outside, बाहर ।
रमेश, राजीव, रमण पीयूष, प्रफुल्ल, सुलेखा, are Proper nouns.

Exercise-अभ्यासः

(A) 'वयम् पठामः'—We learn. Following this example write down the proper forms of verbs mentioned below showing their meaning.

क्रीड्, अट्, भ्रम्, पठ्, पा (पिब्,) ।

(B) Form sentences by putting proper words shown in the table.

अहम्	अपि	गच्छामः ।
वयम्	तत्र	नमावः ।
आवाम्	न	पठामः ।
वयम्	अत्र	धावामि ।

writing—(लेखनम्)

(A) अधुना, तत्र, अपि, नमावः, एव.
use the above words in sentences.

(B) Fill in the blanks.

(१) अहम् ———— नम् । (४) वयम् ———— (हस्)
(२) वयम् ———— पच् । (५) आवाम् ———— (लिख्)
(३) आवाम् ———— खाद् । (६) अहम् ———— (वद्)

चतुर्थः पाठः । (Fourth Lesson)

द्वितीयः पुरुषः । (Second Person)

एकवचनम् — Singular — त्वम् ।

त्वम् धावसि ।

त्वम् लिखसि ।

त्वम् सिञ्चसि ।

त्वम् रक्षसि ।

त्वम् पतसि ।

[illegible] ि बसि ।

त्वम् खादसि ।

त्वम् बालकः ।
अहम् बालिका ।
त्वम् रमेशः ।
अहम् सुलेखा ।
त्वम् गणेशः ।
अहम् प्रदीपः ।
त्वम् विनोदः ।
अहम् रसिकः ।

त्वम् उच्चैः पठसि ।
अहम् तूष्णीम् पठामि ।
त्वम् अधुना आगच्छसि ।
अहम् अधुना आगच्छामि ।
त्वम् तत्र नृत्यसि ।
अहम् अत्र गायामि ।
वयम् क्रीडामः नृत्यामः च ।

Vocabulary–शब्दकोशः

त्वम्–Thou, तुम ।
सिच्–(सिञ्च्) (6.p.) to sprinkle, सिंचना ।
रक्ष्–(1. P.) to save,
गै–(गाय्) (1. P.) to sing, गाना
पत्–(1. P.) to fall, पडना
बालक–a child, लड़का
बालिका–a girl, लड़की
च–(ind.) and, और.
नृत्–(4. P.) to dance, नृत्य करना
तूष्णीम्–(Ind.) silently.
किन्तु–(Ind.) but, परंतु.
आ + गम्–(आगच्छ्), to come आना

Exercise-(अभ्यास:)

(A) Fill in the blank spaces with the proper words.

________ पठाम:	________ पठाव: ।
________ लिखसि	________ लिखाम: ।
________ क्रीडामि	________ गच्छसि ।
________ सिञ्चाव: ।	________ रक्षसि ।

(B) Change the following sentences in the compound sentence (one sentence) as shown below.

Example :—अहम् लिखामि । अहम् पठामि ।
अहम् लिखामि पठामि च ।

1 अहम् खादामि । अहम् पचामि ।

2 आवाम् क्रीडाव: । आवाम् नृत्याव: ।

3 आवाम् अटाव: । आवाम् धावाव: ।

4 अहम् सिञ्चामि । अहम् पिबामि ।

5 वयम् हसाम: । वयम् गच्छाम: ।

Writing - (लेखनम्)—

(A) उच्चै: । शनै: । तूष्णीम् । तत्र । सायम् । प्रात: ।

Use the words written above in sentences.

(B) Translate the sentences in to Sanskrit written below.

(1) I run (2) We sprinkle (3) You write sliently. (4) You speak loudly. (5) We all laugh. (6) Thou movest quickly. (7) We two cook.

पञ्चमः पाठः । (Fifth Lesson)

द्वितीयः पुरुषः । (Second Person)

द्विवचनम्—Dual-(युवाम्)

युवाम् नमथः ।

युवाम् आगच्छथः ।

युवाम् गायथः ।

युवाम् चरथः ।

युवाम् यच्छथः ।

युवाम् पिबथः ।

युवाम् (त्वम् रमेशः रमणः च) क्रीडथः ।

युवाम् (त्वम् सरला सुभद्रा च) गायथः ।

युवाम् (त्वम् राजीवः संजीवः च) भजथः ।

युवाम् खादथः ।

युवाम् आगच्छथः लिखथः च ।

यदा युवाम् क्रीडथः तदा आवाम् पठावः ।

युवाम् पचथः । आवाम् खादावः ।

युवाम् सदा पठथः। आवाम् क्वचित् पठावः।

युवाम् गच्छथः। आवाम् आगच्छावः।

युवाम् भजथः। आवाम् भजावः।

युवाम् उच्चैः वदथः। आवाम् तूष्णीम् वदावः।

यावत् युवाम् तिष्ठथः तावत् आवाम् चलावः।

यावत् युवाम् भ्रमथः तावत् आवाम् धावावः।

Vocabulary—(शब्दकोशः)

युवाम्–You two, तुम दोनों।
दा–(यच्छ्) (I. P.) to give, देना।
भज–(I.U.) to serve, सेवा करना।
स्था–(I. P.) (तिष्ठ्) to stand, खड़ा रहना।
यावत्–(Ind.) So long as, while, जब तक.
तावत्–(Ind.) till, during that time.

सदा–(Ind.) always, नित्य
यदा (Ind.) when, जब
क्वचित्–(Ind.) Sometimes, कभी
तदा–(Ind.) Then, तब.
उप+विश्–(I. P.) to sit down बैठना।
रमण, रमेश, राजीव, संजीव, सरला, सुभद्रा are proper names.

Exercise – (अभ्यासः)

(A) Change each of the following sentence into two sentences.

Example :—युवाम् लिखथः।

त्वम् (रमणः) लिखसि। त्वम् (रमेशः) अपि लिखसि।

(1) युवाम् क्रीडथः।
(2) युवाम् गायथः।
(3) युवाम् गच्छथः।
(4) युवाम् खादथः।
(5) युवाम् भजथः।
(6) युवाम् आगच्छथः।

Writing – (लेखनम्) :—

(B) Fill in the blank spaces by using proper verbs.

(1) आवाम् ———— (लिखथः, लिखावः)

(2) अहम् ———— (पचसि, पचामि)

(3) त्वम् ———— (नमामि, नमसि)

(4) युवाम् ———— (भ्रमथः, भ्रमावः)

(5) वयम् ———— (क्रीडथः, क्रीडामः)

(C) Translate the sentences given below into sanskrit.

(1) You two play (2) We two come (3) You two bow; (4) We two sit. (5) You worship. (6) We give. (7) You two fall down.

षष्ठः पाठः । (Sixth Lesson)

द्वितीयः पुरुषः । (Second Person)

बहुवचनम्—Plural—(यूयम्)

यूयम् किम् खादथ ।

यूयम् किम् लिखथ ।

यूयम् कुत्र भ्रमथ ।

यूयम् कदा पठथ ।

यूयम् किम् न वदथ ।

यूयम् पिबथ ।

यूयम् शनैः चलथ ।

यूयम् उच्चैः गायथ ।

यूयम् प्रातः भ्रमथ ।

यूयम् वहिः गच्छथ ।

यूयम् अन्तः प्रविशथ ।

यूयम् खादथ ।

यूयम् (त्वम् रमेशः रमणः राजेन्द्रः च) आगच्छथ ।
यूयम् (त्वम् सरला सुभद्रा सविता च) पश्यथ ।
यूयम् (त्वम् प्रफुल्लः पीयूषः प्रदीपः च) भजथ ।
यूयम् (त्वम् तारा लता भद्रा च) नयथ ।
यूयम् पचथ । वयम् खादामः ।
यदा यूयम् गच्छथ तदा वयम् आगच्छामः ।
यूयम् शीघ्रम् पठथ किंतु वयम् शनैः पठामः ।
यूयम् सदा क्रीडथ वयम् सदा अटामः ।
यदा यूयम् नयथ तदा वयम् आनयामः ।
यूयम् धावथ किंतु वयम् चलामः ।

Vocabulary–शब्दकोशः ।

दृश्–(पश्य्) (1. P.) to see, देखना

नी–(नय्) (1. P.) to carry, ले जाना ।

आ + नी (नय्) (1. P.) to bring

कुत्र (Ind.) where, कहाँ

किम् (Pro.) What, क्या.

अन्तः–(Ind.) inside, अंदर.

प्र + विश्–(6. P.) to enter, अंदर जाना।

किन्तु–(Ind.) but, परंतु ।

Exercise–अभ्यासः ।

(A) त्वम् नमसि । युवाम् नमथः । यूयम् नमथ ।

Bearing in mind the above sentences, give the various forms of पच्, लिख्, हस्, क्रीड, वद्, गम् (गच्छ्) with त्वम्, युवाम् and यूयम् ।

(B) Put the proper form of the verbs given in brackets :

(१) अहम् अत्र ——— (आ + गम्) । (२) आवाम् तत्र ——— (गम्) । (३) वयम् अपि ——— (नी) । (४) आवाम् सदा ——— (नम्) । (५) वयम् तत्र ——— (चल्) । (६) वयम् अत्र ——— (स्था–तिष्ठ्) ।

writing–लेखनम् ।

(A) Make sentences from words given in the table below.

अहम्	पठावः	तत्र
वयम्	चलसि	अत्र
त्वम्	आगच्छामि	कुत्र
यूयम्	नमथः	अपि
आवाम्	गायामः	न
युवाम्	नयथ	सदा

(B) Translate the sentences given below into Sanskrit.

(1) We see. (2) You two sing loudly. (3) You two move quickly. (4) What do you write ? (5) We run in the morning. (6) Do you read silently ? (7) Do you roam about ?

सप्तमः पाठः । Seventh Lesson

तृतीयः पुरुषः । Third Person

पुंलिग-एकवचनम् (Masc. Singluar) सः ।

स: उपविशति ।

अशोकः नमति । सः नमाति ।

रमेशः गच्छति । सः गच्छति ।

जवाहरः क्रीडति । सः क्रीडति ।

बालः धावति । सः धावति ।

चंद्रकान्तः नृत्यति । सः नृत्यति ।

स: तिष्ठति ।

सः सदा पठति ।

सः किम् खादति ।

सः कदा आगच्छति ।

सः अपि क्रीडति ।

सः (कोकिलः) तत्र कूजति ।

यदा सः गच्छति तदा अहम् अपि गच्छामि ।

यावत् सः क्रीडति तावत् अहम् अपि क्रीडामि ।

यावत् सः धावति तावत् अहम् अपि धावामि ।
यदा सिंहः गर्जति तदा वयम् तूष्णीम् तिष्ठामः ।
यदा शुकः वदति तदा त्वम् नृत्यसि ।

Vocabulary - शब्दकोशः ।

गर्ज्–(1. P.) to roar, गरजना ।
कदा–(Ind.) when, कब
कोकिल–(M.) cuckoo, कोकिल ।
अशोक, रमेश, जवाहर, मोहन, रमा, सीता are proper nouns.

सिंह–(M.) lion, सिंह.
कूज्–(1. P.) to coo, कूजना
शुक–(M.) Parrot, तोता ।
भू–(भव्) to be, होना ।
चन्द्रकान्त is a proper name.

Exercise – (अभ्यासः)

(A) Give all the three forms of the 1st person of the verbs written below :—

नृत्, गै (गाय्), पा (पिब्), नी (नय्), दा (यच्छ्)

(B) Show the difference in verbs used in the sentences below :—

(१) अहम् तत्र गच्छामि । वयम् अत्र गच्छामः ।
(२) त्वम् अत्र पठसि । युवाम् अपि पठथः ।
(३) आवाम् पिबावः । युवाम् अपि पिबथः ।
(४) अहम् नमामि । सः अपि नमति ।
(५) अहम् नृत्यामि । सः अपि नृत्यति ।

Writing – लेखनम् :—

(A) Fill in the blank spaces with the proper form of the verb.

(1) अहम् ———— (पठ्) (2) आवाम् ———— (स्था–तिष्ठ्)
(3) यूयम् ———— (भू–भव्) (4) वयम् ———— (नृत्)
(5) सः ———— (धाव्)

(B) Translate the following sentences into sanskrit :—

(1) Mohan sings (2) Sita roams about in the evening (3) Ramā cooks in the evening (4) When you eat he drinks. (5) So long as I read, you write. (6) So long as you two play, he dances (7) When I stand, you move.

Note :—There are three genders in Sanskrit—(1) पुंलिग is for Masculine (M.) (2) स्त्रीलिग is for Feminine (F.) (3) नपुंसकलिंग is for Neuter gender (N.)

अष्टमः पाठः । Eighth Lesson

तृतीयः पुरुषः । Third Person

पुंलिग–द्विवचनम्—Masculine–Dual

तौ कुत्र क्षिपतः ।
रमेशः रमणः च
तत्र क्षिपतः ।

तौ कुत्र धावतः ।
अश्वः गजः च
तत्र धावतः ।

तौ उपविशतः ।

तौ कदा कूजतः ।

शुकः पिकः च प्रातः कूजतः ।

तौ कदा गुञ्जतः ।

भ्रमरः मक्षिका च सायं गुञ्जतः ।

तौ कदा भषतः ।

कुक्कुरः नक्तम् भषति गर्दभः च चीत्कारम् करोति ।

तौ तिष्ठतः ।

सुधा लता च सदा खेलतः ।

शुकः पिकः च क्वचित् कूजतः ।

कुक्कुरः अश्वः च अधुना धावतः ।

वानरः हरिणः च सायम् उत्पततः ।

सिंहः व्याघ्रः च नक्तम् गर्जतः ।

चक्रवाकः चक्रवाकी च आक्रोशतः ।

यदा रमेशः खादति तदा सुरेशः पिबति ।

यावत् वसंतः सरला च क्रीडतः तावत् लता सुधा च नृत्यतः ।

यत्र सिंहः भ्रमति तत्र मनुष्यः न वसति ।

यत्र हरिणौ चरतः तत्र बालौ क्रीडतः ।

Vocabulary – शब्दकोशः ।

तौ–they two, वे दोनो.

क्षिप्–(6. P.) to throw, फेंकना.

रमेश, रमण, सुधा, लता, सुरेश, वसंत, सरला–are proper names.

अश्व–(M.) a horse, घोड़ा.

गज–(M.) हाथी, an elephant.

पिक–(M.) cuckoo, कोयल.

गुञ्ज्–(1. P.) to buzz, गुंजना.

भ्रमर–(M.) A bee.

मक्षिका–(T.) A fly. मक्खी

भष्–(1. P.) to bark, भूंकना

कुक्कुर–(M.) a dog, कुत्ता.

वानर–(M.) a monkey, वानर

हरिण–(M.) a deer, मृग.

उत् + पत्–to jump, उत्पतति ।

व्याघ्र–(M.) a tiger, बाघ.

नक्तम्–(Ind.) night, रात

चक्रवाक–name of male bird, a red gooses

चक्रवाकी–Female bird

आ + क्रुश् (1. P.) to lament रोना

मनुष्य–(M.) a man, नर

वस्–(1. P.) to dwell, कहना

चीत्कार–(M). scream, चिल्लाना ।

कृ–(करोति) to do करना ।

चर्–(1. P.) to graze, चरना.

बाल–(M.) a child, लड़का.

खेल्–(M.) to play, खेलना ।

Exercise – (अभ्यासः)

(A) तौ नृत्यतः—They two dance.

According to the above example, give the form of each verb given below and show its meaning.

गम् (गच्छ्), पच्, कूज्, भष्, गर्ज, क्षिप्

(B) Fill up the blanks with nouns or pronouns.

(१) ———— लिखतः ।
(२) ———— कूजामः ।
(३) ———— गच्छथः ।
(४) ———— तिष्ठावः ।
(५) ———— नमसि ।
(६) ———— गायतः ।
(७) ———— गच्छथः ।
(८) ———— आगच्छति ।

Writing – लेखनम् ।

(A) Use the following words in a sentence :

सायम्, प्रातः, उच्चैः, तौ, सः ।

(B) Translate into Sanskrit :

(1) He writes. (2) They two sing. (3) I run. (4) Where does the parrot move. (5) He does not study. (6) Ashok and Jayant run. (7) You eat.

नवमः पाठः । Ninth Lesson

तृतीयः पुरुषः । Third Person

पुंल्लिग-बहुवचनम्—Masc. Plural (ते)

सः तत्र पठति ।

तौ अत्र पठतः ।

ते अपि पठन्ति ।

ते उपविशन्ति।

ते क्रीडन्ति । रामः कृष्णः
गोपालः च क्रीडन्ति ।
ते तरन्ति । मीनः मकरः
कच्छपः च तरन्ति ।

ते तिष्ठन्ति ।

ते नृत्यन्ति । शोभा रमा प्रभा च नृत्यन्ति ।
ते कूजन्ति । शुकः कपोतः पिकः च कूजन्ति ।
यदा सिंहाः गर्जन्ति तदा मृगाः धावन्ति ।
यत्र नराः वसन्ति तत्र कुक्कुराः अपि वसन्ति ।
यत्र वृक्षः तिष्ठति तत्र छाया भवति ।
यत्र कृषकः कृषति तत्र वृषभौ अपि चलतः ।
यदा गजः गच्छति तदा कुक्कुराः भषन्ति ।

अश्वः शीघ्रम् धावति ।
वृषभः शनैः धावति ।
सिंहाः स्वैरं भ्रमन्ति ।
गजः अपि स्वैरं भ्रमन्ति ।
वृक्षः सदा तिष्ठति ।
नदी सदा वहति ।

Vocabulary—शब्दकोशः ।

राम, कृष्ण and गोपाल are Proper names.

शोभा, रमा; प्रभा are Proper names.

वृक्ष-(M.) tree, पेड़

छाया-(F.) Shade, छाँव

कृषक-(M.) farmer, किसान

वृषभ-(M.) ox, बैल.

स्वैरम्-(Ind.) at one's own will, freely.

नदी-(F.)river, नदी.

वह्-(I. P.) to flow, बहना ।

मीन-(M.) fish, मछली.

मकर-(M.) Crocodile, मगर.

कच्छप-(M.) torroise, कछुआ.

Exercise—अभ्यासः ।

(1) ते चरन्ति—'They move about' write down the forms of the verbs given below and show their meaning. following the example given above.

कूज्, स्था (तिष्ठ्), कृष् तृ (तर्)

(B) Make one (compound) sentence from the two sentences mentioned below :—

Example :—सः खादति । सः क्रीडति । सः खादति क्रीडति च ।

(१) सः पठति । सः लिखति । (२) सः भ्रमति । सः धावति । (३) रमेशः वदति । रमेशः हसति । (४) शुकः वदति । शुकः नृत्यति ।

Writing—(लेखनम्)

(1) The child runs (2) Swans swim (3) Fish swim (4) The elephant moves, (5) A dog barks, (6) The donkey moves about. (7) Two tigers roar.

दशमः पाठः । Tenth Lesson

तृतीयः पुरुषः । Third Person

स्त्रीलिंग-एकवचनम्—Feminine Singular-सा

सुभद्रा लिखति ।

सा लिखति ।

प्रभा गायति ।

सा गायति ।

लता पतति ।

सा पतति ।

सा नृत्यति ।

सा गायति ।

रमा हसति : सा हसति ।

शाखा विलसति । सा विलसति ।

राधा पठति, विभा न पठति ।

सुभद्रा लिखति, किंतु प्रभा हसति ।

रमा अत्र धावति । शोभा तत्र तिष्ठति ।

लता खादति । पद्मा पचति ।

गंगा गच्छति । यमुना आगच्छति ।

वार्तालापः ।

शोभा – त्वम् कुत्र गच्छसि ?

पद्मा – अहम् तत्र गच्छामि यत्र त्वम् गच्छसि ।

शोभा – तत्र त्वम् पठसि किम् ?

पद्मा – अहम् तत्र न पठामि किंतु तत्र क्रीडामि ।

शोभा – किम् रमा अपि तत्र क्रीडति ।

पद्मा – आम् । सा अपि तत्र क्रीडति ।

शोभा – कुत्र सुभद्रा गच्छति ?

पद्मा – सुभद्रा अपि तत्र गच्छति ।

शोभा – कुत्र विभा धावति ?

पद्मा – विभा तत्र अपि धावति ।

Vocabulary—(शब्दकोशः)

सा–she, वह.

शाखा–(F.) branch, डाली.

वि+लस् (I. P.) to sport, to look nice हिलना, खेलना.

आम्–(Ind.) Yes, सम्मत होना ।

शोभा, पद्मा, सुभद्रा, रमा–proper names.

गंगा, यमुना–the names of the rivers.

Exercise—अभ्यासः ।

(A) पचति, धावति, खादति, लिखति, नृत्यति, आगच्छति—show the meaning by applying the proper pronoun with these verbs.

(B) Fill in the blank spaces by proper pronouns.

(1) ——— गच्छामि । (2) ——— धावथ । (3) ——— नृत्यसि । (4) ——— गुञ्जन्ति । (5) ——— नयामः ।

(C) Fill in the blank spaces with the proper forms of verbs.

(1) वयम् ——— (आ+गम्) । (2) यूयम् ——— (क्रीड्) । (3) युवाम् ——— (धाव्) । (4) ते ——— (भष्) । (5) सा ——— (क्षिप्) ।

Writing – लेखनम् :—

(1) You two write (2) They sing (3) He carries (4) We play (5) Where do you all go (6) That girl cooks (7) Subhadra runs.

एकादशः पाठः । Eleventh Lesson

तृतीयः पुरुषः । Third Person

(स्त्रीलिंग-द्विवचनम्-Feminine Dual-ते

रमा लता च धावतः ।

ते धावतः ।

उमा शोभा च खादतः ।

ते खादतः ।

सुभद्रा सरला च भ्रमतः ।

ते भ्रमतः ।

ते गायतः ।

पन्ना चन्द्रिका च नृत्यतः ।
ते नृत्यतः ।

ते नृत्यतः ।

कमला कोकिला च गायत ।
ते गायतः ।

रमा राधा च कदा पठत ।
ते प्रातः पठतः ।

शोभा शान्ता च कदा क्रीडतः ?
ते सायं क्रीडतः ।
सुमित्रा सुलोचना च कुत्र गच्छतः ?
ते तत्र गच्छतः ।
जया विजया च कुत्र भ्रमतः ?
ते अत्र भ्रमतः ।

Vocabulary—शब्दकोशः ।

स्मृ-(1.P.) to remember याद रखना
स्निह्-(4. P.) to love चाहना
वि + हृ-(1.P.) to sport, to divert विहार करना
छात्र-(M.) Pupil, शिष्य.

पूज्-(10.U.) to worship. to adore.
सूद-(M.) A cook, रसोइदार,
क्व-(ind.) where, कब
शोभा, पन्ना, चन्द्रिका, राधा, राजीव, संजय उमा etc. are Proper names.

Exercise—अभ्यासः ।

(A) Fill in the blank spaces with masculine or Feminine dual pronouns.

(१) ——— पठतः । (२) ——— स्मरन्ति । (३) ——— स्निह्यन्ति । (४) ——— नयतः । (५) ———

विहरतः । (६) ——— कूजतः । (७) ——— आगच्छन्ति । (८) ——— धावन्ति ।

(B) Show the difference between two sentences.

(1) ते तत्र गच्छन्ति । ते तत्र गच्छतः । (2) किम् ते प्रातः विहरन्ति । किम् ते प्रातः विहरतः । (3) ते सायं धावन्ति । ते सायं धावतः ।

Writing—(लेखनम्) :—

Give the Sanskrit words of the following.

(A) Elephant, Cook, Parrot, Pigeon, Horse.

(B) Translate into Sanskrit.

(1) (Two) pupils study. (2) (Two) birds Coo. (3) (Two) parrots sing. (4) (Two) pigeons eat. (5) Mala and Madhurika move about. (6) Sumitra and Sulochana move about. (7) Rajiva and Samjaya remember.

द्वादशः पाठः । Twelfth Lesson

तृतीयः पुरुषः । Third Person

स्त्रीलिंग-बहुवचनम्—Feminine Plural-ताः ।

सुभद्रा सरला सुधा च कथयन्ति । ताः कथयन्ति ।

विजया जया विभा च स्पृहयन्ति । ताः स्पृहयन्ति ।

पद्मा पन्ना चन्द्रिका च

ताः गायन्ति ।

रचयन्ति। ताः रचयन्ति।

उमा शोभा रमा च सिञ्चन्ति। ताः तत्र

सिञ्चन्ति। लता ज्योत्स्ना

कोकिला च प्रशंसन्ति।

ताः एव प्रशंसन्ति।

ताः नृत्यन्ति।

वार्तालापः।

सुधा —सुनन्दा सरला विभा च कुत्र क्रीडन्ति।

सुभद्रा — ताः तत्र क्रीडन्ति।

सुधा — ताः अधुना पठन्ति क्रीडन्ति वा।

सुभद्रा — ताः अधुना क्रीडन्ति न तु पठन्ति।

सुधा — यदा रमेशः रमणः च पिबतः तदा शोभा अपि पिबति ?

सुभद्रा — आम्, सा अपि पिबति।

सुधा — किम् लता उमा च नृत्यतः।

सुभद्रा — नहि, ते न नृत्यतः, ते तु सीव्यतः।

सुधा — किम् ताः सायं विहरन्ति ?

सुभद्रा — आम्, ताः सायं विहरन्ति।

सुधा — किम् ते प्रातः पूजयतः।

सुभद्रा — आम्, ते प्रातः पूजयतः।

Vocabulary – शब्दकोशः ।

कथ्–(10.उ.) to speak, to tell, कहना

स्पृह्–(10. उ.) to desire, इच्छा करना

रच्–(10. उ.) to construct, to compose, रचना करना

प्र + शंस्–(1.P.) to praise, प्रशंसा करना ।

विभा, विजया, सुनन्दा, सुभद्रा, ज्योत्स्ना are Proper names.

सीव्–(4.P.) to sew, सीना.

पूज्–(10.उ) to worship, to adore, पूजना ।

Exercise – अभ्यासः ।

(A) Taking सा ते ताः as subjects, write the forms of the following verbs :—स्पृह्, सिच् (सिञ्च्), पूज्, सीव्, स्निह्, नृत् ।

(B) Show the difference between the two sentences given below and give their meaning.

(1) सः नमति । सा नमति । (2) तौ पूजयतः । ते पूजयतः । (3) ते रचयन्ति । ताः रचयन्ति । (4) तौ कथयतः । ते कथयन्ति । (5) तौ स्पृहयतः । ते स्पृहयतः ।

(C) Writing—लेखनम् ।

Make as many sentences as you can from the table given below.

सः	तत्र	पठामि
त्वम्	कदा	लिखति
सा	अत्र	पठसि
वयम्	एव	वदामः
ते	बहिः	पूजयथ
यूयम्	कुत्र	स्निह्यथः
युवाम्	एव	कथयन्ति
अहम्	तदा	रचयति

(D) Translate the following sentences into Sanskrit.

(1) He plays just now. (2) The (two) girls sew. (3) Shobha and Prabha run quickly. (4) The (two) girls study there. (5) They worship here. (6) You (all) construct. (7) The girls sew.

Grammar—व्याकरणम् ।

Present Tense (वर्तमानकाल)

Parasmaipadi Terminations

Person	Singular	Dual	Plural
1st Person	मि	वस्	मस् ।
2nd Person	सि	थस्	थ ।
3rd Person	ति	तस्	अन्ति ।

प्रथमः गणः । (First Conjugation)

The sign of the first conjugation is अ. some changes occur before applying this अ to the verbs.

Verb + sign of the conjugation +
Tense's Termination

(1) वद् + अ + ति = वदति (2) वस् + अ + ति = वसति

Rule :—(1) In adding the sign अ of the first conjugation the final short or long vowel and the penultimate short vowel only take guna. The अ is hence strong.

Rule :—(2) The guna of इ-ई is ए, of उ-ऊ is ओ, of ऋ or ॠ is अर्, of ऌ it is अल् and of अ is अ.

Rule :—(3) After the guna, according to the rules of vowel sandhi ए becomes अय्, ऐ becomes आय्, ओ then becomes अव् and औ becomes आव्.

Rule :—(4) The sign अ of the first conjugation becomes आ before the terminations of the 1st person beginning with म् and व् ।

(3) भू + अ + ति = भू + ओ + अ + ति = भ् + अव् + अ + ति = भवति

(4) नी + अ + ति
= ने + अ + ति
= नय् + अ + ति = नयति ।

(5) स्मृ + अ + ति
स्मर् + अ + ति = स्मरति ।

(6) जीव् + अ + ति = जीवति ।

(7) बुध् + अ + ति
बोध् + अ + ति = बोधति

(8) बुध् + अ + मि
बोध् + आ + मि = बोधामि
बोध् + आ + वः = बोधावः ।

(9) निन्द् + अ + ति = निन्दति ।

बुध् (I. P.) to know
Present Tense

Person	Sing.	Dual	Plural
1st.	बोधामि	बोधावः	बोधामः।
2nd.	बोधसि	बोधथः	बोधथ ।
3rd.	बोधति	बोधतः	बोधन्ति ।

भू (1·u.) to be (is, are)
Present Tense

Person	Sing.	Dual	Plural
1st.	भवामि	भवावः	भवामः।
2nd.	भवसि	भवथः	भवथ ।
3rd.	भवति	भवतः	भवन्ति ।

अकारन्त पुंलिग — (बाल शब्दः) (A boy)

Masculine Nouns ending in अ (बाल)

Terminations	Case	Sing	Dual	Plural
Subject	Nominative	बालः	बालौ	बालाः ।
Object	Accusative	बालम्	बालौ	बालान् ।
with, by	Instrumental	बालेन	बालाभ्याम्	बालैः ।
to, for, behalf	Dative	बालाय	बालाभ्याम्	बालेभ्यः ।
From, out of	Ablative	बालात्	बालाभ्याम्	बालेभ्यः ।
of, belonging	Genitive	बालस्य	बालयोः	बालानाम् ।
in, among, on	Locative	बाले	बालयोः	बालेषु ।
address.	Vocative	हे बाले	हे बालौ	हे बालाः ।

Decline अश्व, गज, सिंह, राम etc. like बाल । अकारान्त नपुंसकलिंग 'फल' शब्दः । Neuter Nouns ending in अ. । (फल)

Case	Sing	Dual	Plural.
Nominative	फलम्	फले	फलानि ।
Accusative	फलम्	फले	फलानि ।
Vocative	फल	फले	फलानि ।

The other forms of neuter nouns, in other cases are declined according to the masculine noun 'बाल' mentioned above like–फलेन फलभ्याम् फलैः ।

General Rules.

(1) Words are of three Kinds in Sanskit :—
Declinables (प्रातिपदिक), indeclinables (अव्यय) and Root–verbs (धातु).

(a) Declinables include nouns (नाम) Pronouns (सर्वनाम) and adjectives (विशेषण) are declined to show number, gender and case.

(b) Indeclinables include adverbs, Prepositions or prefixes (उपसर्ग—प्र, परा, अप, सम, अनु, अव, निस्, निर्, दुस, दुर्, वि, आङ्, अधि, प्रति, परि, उप, etc., conjunctions (च–अथवा) and interjections are so called from their being incapable of declension.

(2) There are three genders in Sanskrit viz. Masculine पुंलिंग), Feminine (स्त्रीलिंग), Neuter (नपुसंकलिंग) As a general rule everynoun is declined in one Particular gender, which must be found out from the vocabulary where it

is given in its base or crude form. Unlike nouns adjectives are declined in all the three genders according to the nouns which they qualify in all respects.

(3) There are three numbers, the singular (एकवचन) the dual (द्विवचन) the plural (बहुवचन); the dual number denotes ' two '.

(4) There are eight cases in each number viz. nominative (प्रथमा), Accusative (द्वितीया), Instrumental तृतीया, Dative (चतुर्थी) Ablative (पंचमी), Genitive (षष्ठी), Locative (सप्तमी), Vocative (संबोधनम्).

(5) Nouns and adjectives ending in अ are declined like बाल in the masculine, like फल in the neuter gender and nouns and adjectives ending in आ are deelined like माला in the Feminine gender.

त्रयोदशः पाठः । Thirteenth Lesson

प्रथमा–द्वितीया विभक्तिः ।

प्रथमा विभक्तिः । (कर्ता)

गजः शनैः चलति ।

एकवचनम्	द्विवचनम्	बहुवचनम्
सिंहः गर्जति ।	शिष्यौ पठतः ।	वानराः कूर्दन्ति ।
व्याघ्रः धावति ।	खगौ कूजतः ।	गजाः पिबन्ति ।
अनलः ज्वलति ।	वृक्षौ फलतः ।	मृगाः चरन्ति ।
पवनः वहति ।	किंकरौ नयतः ।	अजाः भक्षयन्ति ।
रामः वदति ।	मूर्खौ हसतः ।	वृकाः धावन्ति ।

द्वितीया विभक्तिः (कर्म)

भ्रमरः पुष्पम् जिघ्रति ।

एकवचनम्

वयम् *उपवनम् गच्छामः ।
अहम् फलम् खादामि ।
कृष्णः पाठम् स्मरति ।
बाला पुष्पम् स्मरति ।
बालः दुग्धम् पिबति ।
यूयम् अन्नम् भक्षयथ ।
कूर्मः तडागम् प्रविशति ।

द्विवचनम्

कृषकः वृषौ नयति ।
बालः मोदकौ भक्षयति ।
भक्तौ हरिहरौ भजतः ।
बालौ पर्वतौ आरोहतः ।
वयम् रामलक्ष्मणौ नमामः ।
सः फले खादति ।
किंकरः अश्वौ नयति ।

बहुवचनम्

वयम् पत्राणि लिखामः ।
छात्राः आचार्यान् नमन्ति ।
वानराः फलानि भक्षयन्ति ।
बालिकाः गीतानि गायन्ति ।
अध्यापकः काव्यानि पठति ।
ईश्वरः भक्तान् रक्षति ।

Note :—Rule of case.

* The place to which we have to go, is always accusative.

Vocobulary - शब्दकोशः

अनल-(m.) fire, अग्नि.
ज्वल्-(1. P.) to burn, जलना
पवन-(m.) wind, वायु.
वह्-(1.P.) to flow, to carry, to blow, बहना.
मूर्ख-(m.) a foolishman, मूर्ख.
हस्-(1.P.) to laugh, हँसना
अज-(m.) goat, sheep, भेड़, बकरा.
वृक-(m.) a wolf, भेडिया
उपवन-(N) a garden
फल-(N.) fruit, फल
पुष्प-(N.) flower, फूल
दुग्ध-(N.) milk, दूध
ईश्वर-(M.) God, ईश्वर.
घ्रा-(जिघ्र) (1. P.) to smell सूँघना
आ + रुह्-(1.P.) to ascend. चढ़ना
वन (N.) forest, जंगल
मन्दम् (ind.) slowly, gently. धीरे
अन्न-(N.) corn, अनाज.
प्र + विश्-(6.P.) to enter, प्रवेश करना.
तडाग-(m.) a pond, तालाब
वृष-(M.) a bullock. बैल.
मोदक-(M.) a sweet ball, लड्डु
भक्त-(M.) a devotee, भक्त.
हरिहरौ-Proper names of lord Vishnu and lord Shiva.
पर्वत-(M.) mountain, पर्वत.
किंकर-(M.) servant, नौकर.
पत्र-(N.) a letter, पत्र.
आचार्य-(M) a teacher, a preceptor, आचार्य ।
गीत-(N.) a song, गीत.
अध्यापक-(M.) a teacher, गुरु.
काव्य-(N.) Poetry, काव्य.
तृण-(N.) grass, घास
मृग (m) deer, हरिण.
राम, लक्ष्मण are Proper names.
किम्-(अ) what, क्या

: Excrsise :

(A) Put the proper words in the blank spaces with the verbs given below and write their meaning.

Example :—पिबति । बालः पिबति । A child drinks.

(1) ______ चरन्ति । (2) ______ वदतः । (3) ______ जिघ्रामः । (4) ______ भक्षयथ । (5) ______ अजतः । (6) ______ स्मरथ । (7) ______ गायतः । (8) ______ आरोहत; ।

लेखनम् – Writing :—

(B) Use the words given below in sanskrit sentences.
वानरः, अजः, भ्रमरः, कृषकौ, वृषः तडागम् ।

(C) Translate into Sanskrit.
(1) The tiger goes to the forest. (2) A parrot sings a song. (3) The wind blows gently. (4) Do the monkeys laugh? (5) Does the sheep roar. (6) The deer moves about. (7) A lion and a tiger do not eat grass.

(D) स्मृ (स्मर्) and पा (पिब्).
Write all the forms of all the persons and number of the above mentioned verbs.
Memorise : (1) Forms of the first conjugation (2) Forms of the word बाल of the nominative and accusative case.

Grammar—व्याकरणम् ।

षष्ठः गणः—Sixth conjugation.

In the sixth conjugation before appending the personal terminations, the conjugational sign अ (weak) is to be inserted to the root.

Root or verb + Conjugational sign + terminations of the present tense.

(1) विश + अ + ति = विशति । (2) सृज् + अ + ति = सृजति । (3) प्रच्छ् (पृच्छ्) + अ + मि = पृच्छामि । (4) इष् (इच्छ्) + अ + ति । इच्छ् + अ + ति = इच्छति । (5) मुच् (मुञ्च्) + अ + मि । मुञ्च् + आ + मि = मुञ्चामि ।

Before applying the sixth conjugational sign अ no change takes place in the root or the verb, because the अ is weak and not strong like the अ of the first conjugation.

Verbs are of two categories or classes—(1) Parsmaipada (परस्मैपद) and (2) Atmanepada (आत्मनेपद). Some verbs

belong to both the categories and they are styled ubhayapada (उभयपद). Each class has its own terminations in all the tenses and words. Ubhayapada verbs take the terminations of both the categories.

आत्मनेपद–वर्तमानकाल–प्रत्ययाः ।

Atmanepada–Present Tense–Terminations

पुरुषः	ए. व.	द्वि. व.	ब. व.	
प्र. पु.	इ.	वहे	महे ।	लभ् + अ + इ = लभे ।
द्वि. पु.	से	इथे	ध्वे ।	लभ्+अ+(आ) + वहे = लभावहे ।
तृ. पु.	ते	इते	अन्ते ।	लभ् + आ + महे = लभामहे ।

परस्मैपद				आत्मनेपद		
	विश् (6. P.) to enter			वन्द् (1. आ) to bow		
प्र. पु.	विशामि	विशावः	विशामः ।	वन्दे	वन्दावहे	वन्दामहे ।
द्वि. पु.	विशसि	विशथः	विशथ ।	वन्दसे	वन्देथे	वन्दध्वे ।
तृ. पु.	विशति	विशतः	विशन्ति ।	वन्दते	वन्देते	वन्दन्ते ।

माला–Feminine noun ending in आ ।

आकारान्त स्त्रीलिंग 'माला' शब्दः ।

विभक्तिः	ए. व.	द्वि. व.	ब. व.
प्रथमा–Nom.	माला	माले	मालाः ।
द्वितीया–Acc.	मालाम्	माले	मालाः ।
तृतीया–Inst.	मालया	मालाभ्याम्	मालाभिः ।
चतुर्थी–Dat.	मालायै	मालाभ्याम्	मालाभ्यः ।
पंचमी–Abl.	मालायाः	मालाभ्याम्	मालाभ्यः ।
षष्ठी–Gen.	मालायाः	मालयोः	मालानाम् ।
सप्तमी–Loc.	मालायाम्	मालयोः	मालासु ।
संबोधनम्–Voc.	माले	माले	मालाः ।

All nouns ending in आ like बाला, लता, शाला are deelined like माला ।

Exception :—The vocative singular of अम्बा, अक्का, and अल्ला all meaning 'a mother' is अम्ब, अक्क, अल्ल respectively.

चतुर्दशः पाठः । Fourteenth Lesson

तृतीया विभक्तिः । (करण)

कृषकः हलेन कृषति ।

एकवचनम्

अश्वः वेगेन धावति । गायकः लयेन गायति ।
अज्ञानम् ज्ञानेन नश्यति । *वानरः मुखेन फलम् खादति ।
बालाः हस्तेन लिखन्ति । *वयम् कन्दुकेन क्रीडामः ।
+चन्द्रेण विना निशा न शोभते ।

द्विवचनम्

नराः चरणाभ्याम् क्रीडन्ति । जनाः नेत्राभ्याम् पश्यन्ति ।
वयम् कर्णाभ्याम् आकर्णयामः । वानराः पादाभ्याम् कूर्दन्ति ।
पुरुषः विद्याविनयाभ्याम् शोभते । खगाः पक्षाभ्याम् डयन्ते ।

बहुवचनम्

बालाः कन्दुकैः खेलन्ति । ०अध्यापकाः छात्रैः सह खेलन्ति ।
वाटिकाः लताभिः शोभन्ते । नृपाः चारैः पश्यन्ति ।
बालाः बालिकाः च शीलेन शोभन्ते । मृगाः मृगैः सह चरन्ति ।
वनिताः मालाभिः शरीरं भूषयन्ति । ×नरेशः नेत्रेण काणः ।

Note : Case rule of the Instrumental.

* (1) This case is used when the noun is used as an instrument. +(2) विना governs the accusative, the instrumental or the ablative. 0(3) सह governs the instrumental. ×(4) If the parts or limbs of the body are defeetive, they are in the instrumental.

— शब्दकोश : (Vocabulary) —

वेग-(M.) velocity, speed
ज्ञान-(N.) knowleelge, ज्ञान
अज्ञान-(N.) ignorance अज्ञान
नश्-(4.P.) to perish, नाश होना
हस्त-(M.) hand, हाथ
गायक-(M.) Songster, गायक
लय-(M.) rhythm, ताल
मुख-(N.) mouth, मुंह
कन्दुक-(M.) a ball, गेंद
निशा-(F.) Night, रात्रि
विना-(Ind.) without, बिना
पाद-(M.) leg, पाँव ।
पक्ष-(M.) wing, पाँख ।
डी.-डय्-(I. A.) to fly, उड़ना
वाटिका-(F.) orchard
लता-(F.) creeper, लता
माला (F.) garland, माला ।
शरीर (N.) body, देह
भूष् (10.u.) to beautify, सुशोभित होना ।
सह-(Ind.) with, साथ में
नृप-(M.) king, राजा
छात्र (M.) a pupil, विद्यार्थी
चन्द्र-(M.) moon, चाँद
शुभ्-शोभ्-(1.A.) to adorn, to shine
चरण-(M.) foot, पाँव
कर्ण-(N.) ear, कान
आ + कर्ण् (10.u.) to hear, सुनना ।
पुरुष-(M.) man, नर
विद्या-(F.) knowledge, science, ज्ञान
विनय-(M.) Modesty, नम्रता
नेत्र-(N.) eye, आँख
चक्र-(N.) wheel, पहिया
रथ-(M.) chariot, रथ
अर्घ्य-(N.) offering of water
पूज्-(10.u.) to worship पूजा करना
जि-जय्-(1.P.) to win, जितना
अनुचर-(M.) attendent
बाला-बालिका-(F.) girl. लड़की
बाल (M.) boy, लड़का
चार-(M.) spy, गुप्तचर
दृश्-(1.P.-पश्य्) to see, देखना
मृग-(M.) deer, हरिण
काण-(Adj.) one eyed, काणा
नरेश-(M.) proper noun

बधिर-(Adj.) deaf, बहरा
खञ्ज-(Adj.) lame, पङ्गु
मूक-(Adj.) dumb, मूँगा
अन्ध-(Adj.) blind, अन्धा
क्षिप्-(1.P.) to throw, फेंकना
लभ्-(1.A.) to get, प्राप्त करना
विश्-(6.P.) to enter, दाखिल होना
वन्द्-(1.A.) to bow
प्रच्छ्-(पृच्छ्) (1.P.) to ask, पूछताछ करना
सृज्-(6.P.) to create, सर्जन करना।
चर्-(1.P.) to graze, चरना
शील-(N.) character, चारित्र्य

Exercise—(अभ्यासः)

(A) Fill in the blank spaces by putting proper word from those given in the bracket.

(1) जनाः ———— (चरणेन, मुखेन) खादन्ति।
(2) वयम् ———— (हस्ताभ्याम्, चरणाभ्याम्) चलामः।
(3) सिंहः ———— (चरणैः, हस्तैः) धावति।
(4) सुरेन्द्रः———— (नेत्राभ्याम्, कर्णाभ्याम्) बधिरः।
(5) रमेशः ———— (मुखेन, नेत्रेण) काणः।

(B) Finish the Sentence with the proper word.

(1) सः ———— खञ्जः।
(2) गोपालः ———— सह क्रीडति।
(3) मृगः ———— धावति।
(4) बालः ———— अन्धः।
(5) मूकः ———— न वदति।

Writing-(लेखनम्)

Translate into Sanskrit

(1) The chariot moves with two wheels. (2) Rama worships the sun by his arghya pot (3) Rama conquers Ravana by the monkeys. (4) Gopal goes to the forest with the servants. (5) Girls play with the ball. (6) Students write with their hand. (7) Rama throws the ball by the hand.

Memorise : (1) The case forms of माला.

(2) The forms of the verb 'विश्'

= व्याकरणम् –

चतुर्थः गणः (Fourth conjugation)

The sign of the fourth conjugation is य ।

Verb or root + Conjugational sign + tense terminations.

(1) तुष् + य + ति = तुष्यति. (2) शुष् + य + ति = शुष्यति ।

(3) कुप् + य + ति = कुप्यति ।

तुष् (4 P.) to satisfy. युध् (4. A.) to fight a war.

	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र. पु.	तुष्यामि	तुष्यावः	तुष्यामः ।	युध्ये	युध्यावहे	युध्यामहे ।
द्वि. पु.	तुष्यसि	तुष्यथः	तुष्यथ ।	युध्यसे	युध्येथे	युध्यध्वे ।
तृ. पु.	तुष्यति	तुष्यतः	तुष्यन्ति ।	युध्यते	युध्येते	युध्यन्ते ।

Note : य, the sign of the 4th conjugation is weak, so it does not cause any change like guna in the verb.

पंचदशः पाठः । (Fifteenth Lesson)

चतुर्थी विभक्तिः । (संप्रदानम्)

नृपः याचकाय धनम् यच्छति ।

[] भिक्षुकाः आहाराय भ्रमन्ति । धनम् दानाय भवति ।
छात्राः पुस्तकानि ज्ञानाय पठन्ति । बालाः पोषणाय दुग्धम् पिबन्ति ।
कृषीवलाः धान्याय क्षेत्रम् कृषन्ति । वृक्षाः परोपकाराय फलन्ति ।
जनाः विहराय उद्यानम् गच्छन्ति । दीपकः प्रकाशाय भवति ।
०कृष्णाय नमः ।

द्विवचनम्

कृषीवलः वृषाभ्याम् तृणम् आनयति ।

किंकरः अश्वाभ्याम् चणकान् नयति ।

जनाः अर्थकामाभ्याम् व्यापारम् कुर्वन्ति ।

भक्तः भक्तिमुक्तिभ्याम् नारायणम् भजति ।

बहुवचनम्

* धनिकाः भिक्षुकेभ्यः भोजनम् यच्छन्ति ।

+ दुर्जनाः सज्जनेभ्यः द्रुह्यन्ति । ×बालेभ्यः क्रीडनकानि रोचन्ते । छात्रेभ्यः पुस्तकानि रोचन्ते । फलेभ्यः उपवनम् गच्छामि ।

जनाः ज्ञानाय मानाय धनाय च शास्त्राणि पठन्ति ।

Note :—[] (1) If the action takes place with an aim or purpose, it is put in the dative. ∘(2) नमः–bow to–This indeclinable governs the dative. * (3) The person to whom something is given is placed in the dative. +(4) क्रुध and द्रुह–These two verbs govern the dative case. × (5) रुच्–The person who likes is in the dative case and the thing liked is the subject, in the nominative.

Vocabulary—शब्दकोशः ।

भिक्षुक-याचक-(M.) a mendicant, a begger
आहार-(M.) dinner, खुराक
दान-(N.) charity, gift
धन-wealth, money
पोषण-(N.) nourishment
दुग्ध-(N.) milk, दूध
कृषीवल-(M.) farmer किसान
धान्य-(N.) corn, अनाज
क्षेत्र-(N.) field, खेत
परोपकार-(M.) benevolence
फल्-(1.P.) to bear fruit
विहार-(M.) sport, विहार
उद्यान-उपवन-(N.) garden, बाग
दीपक-(M.) lamp, दिया
प्रकाश-(M.) light, तेज

नमः-(Ind.) Bow to, नमस्कार करना
वृष-(M.) ox, बैल
तृण-(N.) grass, घास
आ+नी (आनय) to bring लाना
किंकर-(M.) servant नौकर
चणक-(M.) gram, चना
अर्थ-(N.) wealth, meaning, धन
काम-(M.) desire इच्छा enjoyment
व्यापार-(M.) activity, business
शास्त्र-(N.) Science, Scripture.
भक्ति-(F.) devotion.
मुक्ति-(F.) Salvation. मोक्ष
नारायण-(M.) other name of the Lord Vishnu.
धनिक-(M.) wealthy, rich man.
भोजन-(N) dinner, खाना
दुर्जन-(M.) bad man, दुष्ट
सज्जन-(M.) good man
द्रुह्-(4. P) to envy, breach of trust.
क्रीडनक-(N.) toy, खिलौना
रुच्-(1. P.) to like, अच्छा लगना
मान-(M.) respect
शिव-(M.) the name of a deity, शंकर
पर्ण-(N.) leaf, पत्ता
पारितोषिक-(N.) prize, इनाम
इतस्ततः-(Ind.) here and there, इधर उधर
सुवर्ण-(N.) gold, सोना
कल्याण-(N.) welfare, हित
कुप्-(4. P.) to be angry, क्रोध करना

Etercise — (अभ्यास)

(A) Put the proper case of the nouns given in the brackets.
(१) (शिव) नमः। (२) किंकरः (गज) पर्णानि आनयति। (३) आचार्यः (शिष्य) पारितोषिकम् यच्छति। (४) मृगः (आहार) भ्रमति। (५) दीपः (प्रकाश) ज्वलति।

Writing-(लेखनम्)

(B) (1) I give a sweet ball to Gopal. (2) Bow to the Gods. (3) The dog roams about here and there for food. (4) The king gives gold to the Brahmins. (5) You go to the garden for flowers. (6) People worship god for welfare. (7) The king is angry with the servants.

(C) Write down the forms of all the three persons of the verbs दुह् and नश्.

परस्मैपद अस् (2. U.) to be, Parsmaipada

पुरुषः	ए. व.	द्वि. व.	ब. व. ।
प्र. पु.	अस्मि	स्वः	स्मः ।
द्वि. पु.	असि	स्थः	स्थ ।
तृ. पु.	अस्ति	स्तः	सन्ति ।

व्याकरणम् ।

दशमः गणः — Tenth Conjugation

अय is the sign of the tenth conjugation which is strong. So there is a change in the verb or the root of that class. The final short or long vowel and the penultimate अ take वृद्धि (Vriddhi). The वृद्धि of अ is आ, of इ or ई is ऐ, of उ or ऊ is औ, of ऋ or ॠ is आर् and of ऌ it is आल् The penultimate short vowel (except अ) takes गुण.

Verb or root + Conjugational sign + Terminations of the tense.

(1) तड् + अय + ति = ताड् (वृद्धि of अ) + अय + ति = ताडयति ।
(2) क्षल् + अय + ति । = क्षाल् (वृद्धि of अ) + अय + ति = क्षालयति ।
(3) तुल् + अय + ति = तोल् (गुण of उ) + अय + ति = तोलयति ।
(4) भूष् + अय + ति = भूषयति । (No वृद्धि, no गुण)
(5) धृ + अय + ति = धार् (वृद्धि of ऋ) + अय + ति = धारयति ।

Exceptions to the गुण or वृद्धि rule :—

कथ्, गण्, स्पृह्, मृग्, वर्, रच, etc.

In these verbs the penultimate अ does not take वृद्धि and the short vowel takes no गुण-कथयति, गणयति, मृगयति, स्पृहयति, रचयति etc.

In this conjugation all the verbs belonging to it are of both the पद्s i. e. They are all Ubhayapadi.

तड् (10.u.) to beat, to thrash

	परस्मैपद			आत्मनेपद		
पुरुष	ए. व.	द्वि व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र. पु.	ताडयामि	ताडयावः	ताडयामः ।	ताडये	ताडयावहे	ताडयामहे ।
द्वि पु.	ताडयसि	ताडयथः	ताडयथ ।	ताडयसे	ताडयेथे	ताडयध्वे ।
तृ. पु.	ताडयति	ताडयतः	ताडयन्ति ।	ताडयते	ताडयेते	ताडयन्ते ।

तुल् (10. u.) to weigh, to balance, to compare.

प्र. पु.	तोलयामि	तोलयावः	तोलयामः ।	तोलये	तोलयावहे	तोलयाम ।
द्वि. पु.	तोलयसि	तोलयथः	तोलयथ ।	तोलयसे	तोलयेथे	तोलयध्वे ।
तृ. पु.	तोलयति	तोलयतः	तोलयन्ति ।	तोलयते	तोलयेते	तोलयन्ते ।

षोडशः पाठः । (Sixteenth Lesson)

पंचमी विभक्तिः । (अपादानम्)

एकवचनम्

आकाशात् जलम् पतति ।

वृक्षात् फलानि पतन्ति ।× लताया पुष्पाणि पतन्ति ।

छात्राः सायं पाठशालाया ः प्रतिनिवर्तन्ते ।

कृषीवलाः क्षेत्रात् सायं प्रतिनिवर्तन्ते ।

मुनिकुमारौ वनात् प्रतिनिवर्तेते । गंगा हिमालयात् प्रभवति ।
वयम् प्रातः गृहात् बहिः अटामः । खगाः वृक्षात् वृक्षम् डयन्ते ।
पथिकाः ग्रामात ग्रामम् अटन्ति । पत्रवाहकाः गृहात् गृहम् अटन्ति ।
सार्थः द्वीपात् द्वीपम् अटति । पठनात् बोधः संजायते ।+
बोधात् संशयः नश्यति । नारदः आकाशात् अवतरति ।

द्विवचनम्

समुद्राभ्याम् रत्नानि जायन्ते ।

सूर्यचन्द्राभ्याम् वयम् प्रकाशम् लभामहे ।

वहुवचनम्

बीजेभ्यः अङ्कुराः उद्भवन्ति । कृषीवलाः धान्यम् क्षेत्रेभ्यः नयन्ति ।
[] दुर्जनेभ्यः सज्जनानाम् भयम् भवति । मेघेभ्यः जलम् पतति ।
छात्राः गुरुभ्यः उपदेशम् लभन्ते । वृक्षेभ्यः पर्णानि पतन्ति ।
वनिताः कूपेभ्यः जलम् आनयन्ति ।

Note:—×(1) Anything being separated from something else is in the nominative, while the thing from which it is separated is in the ablative case. +(2) If anything is created or born out of something else, ablative is used for the noun from which it is created. [] (3) When fear arises from something that is in the ablative case.

Vocabulary–शब्दकोशः ।

प्रति+नि+वृत्–(1. A.) to return, लौटना.
आकाश–(न) sky, गगन
मुनिकुमार–(M.) the son of a sage (Rishi).
गंगा–(F.) the river Ganges.
हिमालय–(M.) the name of a mountain.
प्र + भू–(1. P.) } to arise,
उद्+भू–(1. P) } to be born, created.
पथिक–(M.) traveller मुसाफिर.
ग्राम–(M.) Village, गाँव.
सम्+जन्–(जाय्) (1. A.) to born–created.
संशय–(M.) doubt.
नारद–(M.) name of a celestial sage. देवर्षि नारद.
अव+तृ–(1. P.) to descend.
रत्न–(N.) jewel,
सूर्य–(M.) Sun, भानु, सूरज.
बीज–(N.) Seed, बीज.
अङ्कुर–(M.) Sprout.
भय–(N) fear.
मेघ–(M.) cloud, बादल.
पत्रवाहक–(M.) Postman, डाकिया
गृह (N.) house, घर
सार्थ–(M.) caravan, कारवाँ
पठन–(M.) study, अभ्यास
बोध–(M.) knowledge, ज्ञान
प्रासाद–(M.) palace, महल
जल–(N.) water, पानी
उपदेश–(M.) advice, teaching.
वनिता–(F.) woman, नारी, स्त्री.
कुलाल–(M.) potter, कुम्हार
मन्दिर–(N.) Temple, देवालय
अयोध्या–(F.) name of a city.
विमान–(M.) Aeroplane, हवाई जहाज़ ।

Exercise—(पठनम्)

(A) Tell the gender, case and number of the nouns given below :—

नेत्राभ्याम्, पर्णानि, आचार्यान्, सज्जनेभ्यः, पाठशालायाः, कूपेभ्यः, द्वीपैः, रत्नेन, ग्रामाय ।

(B) Tell the conjugation, person and number of the verbs given below.

स्फुरन्ति, हरन्ति, पुष्यामः, उद्भवति, गायामः, रोचध्वे, शोभामहे, जायेते ।

Writing—लेखनम्

(C) Translate the following sentences into Sanskrit.

(1) Shobha brings a jar from the potter. (2) A devotee comes out from the temple. (3) Rama goes to Ayodhya from the forest. (4) Rama, Lakshmana and seeta pass from one hermitage to another, (5) Children learn Sanskrit from the teacher. (6) A king goes out of the palace. (7) Birds fly from the nest in the morning. (8) An aeroplane descends from sky.

(D) Give the proper forms of the verbs given below. (1) 1st. Pers. sing. तड्, धृ, मृग्. (2) 2nd pers plural द्रुह्, गण्, बुध्. (3) 3rd pers. Dual-स्पृह्, चुर्, स्निह्.

सप्तदशः पाठः । Seventeenth Lesson

षष्ठी विभक्तिः । (सम्बन्धः)

केशानाम् वर्णः कृष्णः भवति ।

एकवचनम्

*सूर्यस्य प्रकाशः चण्डः भवति । ×चन्द्रस्य प्रकाशः शीतलः भवति । पर्णस्य वर्णः हरितः अस्ति । शंखस्य वर्णः श्वेतः अस्ति । कोकिलस्य स्वरः मधुरः भवति । काकस्य स्वरः कठोरः भवति । सत्यस्य सदा विजयः भवति । देवस्य कृपया जनाः धनम् विन्दन्ति । कण्ठस्य भूषणम् मधुरम् वचनम् । सर्पस्य विषम् तीव्रम् । सूर्यस्य प्रकाशः आरोग्याय भवति । समुद्रस्य जलम् लवणम् भवति । देवस्य प्रसादेन जीवामि । *नृपस्य प्रासादे कुमाराः वसन्ति ।

द्विवचनम्

कर्णयोः भूषणम् शास्त्रम् न तु कुण्डलम् ।
नेत्रयोः भूषणम् ज्ञानम् न तु अञ्जनम् ।
हस्तयोः भूषणम् ज्ञानम् न तु कङ्कणम् ।
पादयोः भूषणम् तीर्थाटनम् न तु नूपुरम् ।
*रामस्य पुत्रौ कुशलवौ वीरौ भवतः ।

बहुवचनम्

सूर्यस्य आतपः जनानाम् दुःसहः भवति ।
चन्द्रस्य किरणाः जनानाम् आह्लादकाः भवन्ति ।

*वृक्षाणाम् पर्णानि स्फुरन्ति । नराणाम् भूषणम् शीलम् भवति ।
शूराणाम् मरणम् तृणम् इव भवति । दुर्बलानाम् बलम् नृपः भवति ।
ईश्वरः भक्तानाम् विघ्नान् हरति । उपदेशः मूर्खाणाम् प्रकोपाय भवति ।
बृहस्पतिः देवानाम् आचार्यः । शुक्राचार्यः असुराणाम् आचार्यः ।
शास्त्राणाम् तत्त्वम् प्राज्ञः बोधति । सज्जनानाम् चरितम् प्रशस्यम् ।
शठानाम् चरितम् गर्ह्यम् । मेघानाम् जलम् वृक्षान् पुष्यति ।

Note:—*(1) Where there is a relation or connection between father-son, part and whole, quality and its possessor, ownership and the thing owned, the genitive case is used. (2) The adjectives like हरित, शीतल etc. take the gender, case and number of the noun which they qualify.

Vocabulary–शब्दकोशः

चण्ड-(Adj.) hot, गर्म.
शीतल-(Adj.) cold, ठंडा.
वर्ण-(M.) Colour, रंग
हरित-(Adj.) green, हरा
श्वेत-(Adj.) white, सफेद

शंख-(M.) conch.
मधुर-(Adj) Sweet, मीठा
स्वर-(M.) Sound, आवाज़
कठोर-(Adj.) harsh, कठोर
सत्य-(N.) Truth, सत्य

विजय-(M.) Victory, जय.
कङ्कण-(N.) bangle, कंगन
तीर्थाटन-(N.) to go on a pilgrimage
नूपुर-(N.) anklet, पाजेब
पुत्र-(M.) son, लड़का
कुश लव-the sons of Rama
वीर-(M.) A brave man
आतप-(M.) heat, गर्मी
दुःसह-(Adj.) unbearable
किरण-(M.) ray
आह्लादक-(Adj.) delightful. pleasant
स्फुर्-(6. P.) to throb, हिलना
देव-(M.) God, देवता
कृपा-(F.) grace, favour, मेहरबानी
विद्-(६प विन्द्) to obtain
केश-(M.) hair, बाल
कण्ठ-(N.) neck, गला
भूषण-(N.) ornament
वचन-(N.) word, शब्द
सर्प-(M.) Serpent, साँप
विष-(N.) poison, जहर
तीव्र-(Adj.) acute
आरोग्य-(M.) health, तंदुरस्ती
जल-(N.) water, पानी
लवण-(N.) Salt, खारा
प्रसाद-(M.) favovr, कृपा
जीव्-(1.P.) to live, जीना
कुमार-(M.) prince, boy, कुँवर
कुण्डल-(N.) ear-ring
अञ्जन-(N) Collyrium, काजल
तापस-(M.) ascetic, तपस्वी
कोमल-(Adj.) tender
सदाचार-(M.) good conduct
शठ-(M.) rogue, धूर्त, cunning
शूर-(M.) A brave man, वीर
मरण-(N.) death, मृत्यु
इव-(Ind.) like, similar
दुर्बल-(M.) weak,
विघ्न-(M.) obstacle,
बल-(M.) strength
नृप-(M.) king
हृ-हर्-(1 P.) to evade, दूर करना
प्रकोप-(M.) anger, क्रोध
बृहस्पति-शुक्राचार्य-epithets of the preceptors
असुर-(M.) demon, राक्षस
तत्त्व-(N.) essence, substanee
प्राज्ञ-(M.) A wiseman, बुध
चरित-(N.) conduet, anact.
प्रशस्य-(Adj) praiseworthy स्तुत्य
गर्ह्य-(Adj.) censurable निन्द्य
पुष्-(4.P.) to nourish
मनोरथ-(M.) desire, wish
दीन-(M.) poor man गरीब
यमुना-(F.) the river yamuna
अनुज-(M.) little brother, छोटा भाई

Exereise

(A) Put in the proper cases and numbers of the words given in the brackets.

(1) रामः (सीता) सह वनं गच्छति। (2) तापसाः (तपोवन) गच्छन्ति। (3) (मेघ) जलं पतति। (4) रामस्य (कोमल) चरणौ भवतः। (5) मनुष्याः (सूर्य) किरणेभ्यः जीवनम् लभन्ते। (6) मनुष्याः (सदाचार) शोभन्ते। (7) (बाल) मोदकाः रोचन्ते। (8) शठाः (सज्जन) द्रुह्यन्ति। (9) (पाद) भूषणम् तीर्थाटनम्।

(B) Put the proper words in the 3rd column by changing as many as possible.

सूर्यस्य	प्रकाशः	हरितः।
केशानाम्	वर्णः	शीतलः।
चन्द्रस्य	प्रकाशः	श्वेतः।
पर्णानाम्	वर्णः	कृष्णः।
शंखस्य	वर्णः	चण्डः।
हस्तयोः	भूषणम्	कठोरः।
काकस्य	स्वरः	दानम्।

Writing—लेखनम्

(A) Translate in to Sanskrit.

(1) The wealth of kings is for benevolence. (2) The moon's rays shine at night. (3) The rays of the sun are soft in the morning. (4) Desires of poor people arise in their mind and are then destroyed. (5) Ascetics reside on the banks of the

Ganges. (6) The waters of the Ganges are white and those of Yamuna are black. (7) Lakshmana is the younger brother of Rama.

(B) Give the forms required :—

(1) 1st Per. sing. शुभ् (शोभ्), उद् + भू, (वि + हृ)

(2) 2nd pers. dual लभ्, रुच् (रोच्), जन् (जाय्)

(3) 3rd pers. plural स्फुर्, पुष्, वृष् (वर्ष्)

अष्टादशः पाठः । Eighteenth Lesson

सप्तमी विभक्तिः । (अधिकरणम्)

एकवचनम् ।

सूर्यः प्रातः आकाशे प्रकाशते । चन्द्रः निशायाम् आकाशे प्रकाशते ।
*विहगाः वृक्षे वसन्ति । ते आकाशे उड्डयन्ते ।
पर्वतस्य गुहायाम् वनचराः वसन्ति ।
वृक्षस्य शाखासु विहगाः नीडान् रचयन्ति । वृषभः क्षेत्रे चरति ।
सीता छायायाम् उपविशति । वयम् विद्यालये संस्कृतम् पठामः ।
अवकाशे बालाः क्रीडन्ति । + जनकः पुत्रे स्निह्यति ।

द्विवचनम्

रामस्य हस्तयोः पुष्पाणि सन्ति । सीतायाः कर्णयोः कुण्डले भवतः ।
सुधायाः नेत्रयोः अञ्जनम् अस्ति । रमायाः पादयोः नूपुरे भवतः ।

बहुवचनम्

जनाः ग्रीष्मे पर्वतेषु वसन्ति । कृषीबलाः क्षेत्रेषु बीजानि वपन्ति ।
तापसाः कटेषु उपविशन्ति । गोविन्दः छात्रेषु श्रेष्ठः भवति ।
खगाः वृक्षेषु कूजन्ति । वाटिकासु वृक्षाः विलसन्ति ।
धीराः सङ्कटेषु धैर्यम् धारयन्ति ।

Note : *(1) The place where the action takes place is in the locative. (2) The verb 'स्निह्' is used in the locative for the person when it is loved.

शब्दकोशः — (Vocabulary)

प्र + काश् (1. A.) to shine, प्रकाशना
उद् + डी-(1. A.) to fly, उड़ना
गुहा-(F.) cave, गुफा.
शाखा-(F.) branch, डाली.
छाया-(F.) shade.
विद्यालय-(M.) school, पाठशाला.
वनचर-(M.) forester.
अवकाश-(M.) holiday, leisure, छुट्टी.
जनक-(M.) Father. पिता
स्निह्-(4. P.) to love चाहना
अस्-(सन्ति) (2.P.) to be, is, are होना
ग्रीष्म-निदाघ (M.) summer, गर्मीकी ऋतु
वप्-(1. P.) to sow, बोना
कट-(M.) mat, चटाई.
गोविन्द-Proper name.
धृ-(धार्-10. u.) to bear, to put on.
सैनिक-(M.)soldier.
पाल्-(10 u.) to nourish, to protect.
अन्न-(N.) cornseed.
जलचर-(M.) acquatic animal.
तप्-(1. P.) to perform penance.
शिशिर-(M.) winter, जाड़ा
वर्षा-(F.) Monsoon,
भेक-(M.) frog, दर्दुर
रस्-(1. P.) to make sound
रस्-(10. u.) to taste
उटज-(M.) cottage झोंपडी.
शिखर-(M.N.) summit
हिम-(N.) snow, बर्फ
चुर्-(10.u.) to steal. चोरी करना।
श्रेष्ठ-(Adj.) best.
सङ्कट-(N.) difficulty.
धीर-(M.) steadfast man
धैर्य-(M.) Patience, धीरज
रक्ष्-(1. P.) to protect, बचाना
कदापि-(ind.) ever, कभी भी.

Exercise — (अभ्यासः)

(A) Give the forms demanded of the words given below.

(1) Locative singular : भ्रमर, मीन, क्षेत्र, लता, हस्तिन् (पुं)
(2) Locative plural : नूपुर, गुहा, दीन, तापस.

(B) Put the proper word in the second column :—

नृपः	सरोवरे	वसति ।
खगाः	रसम्	गायन्ति ।
सूर्यः	प्रासादे	भ्रमति ।
मीनाः	क्षेत्रे	तरन्ति ।
सिंहः	आकाशे	गर्जति ।
भ्रमराः	गीतम्	पिबन्ति ।
गर्दभः	वने	चरति ।

(C) Writing–(लेखनम्)

Make the right sentence by joining the proper word given in the bracket.

(1) भ्रमराः पुष्पेषु रसम् (पिबन्ति, गुञ्जन्ति) (2) सैनिकाः देशम् (रक्षन्ति, त्यजन्ति) (3) जनकः पुत्रे (स्निह्यति, पालयति)। (4) विहगाः नीडेषु (वसन्ति, चरन्ति) (5) धनिकाः याचकेभ्यः अन्नम् (खादन्ति, यच्छन्ति)।

(D) Translate the following sentences into sanskrit.

(1) Acaquatic animals swim in the sea. (2) Ascetics practise penance in the forest. (3) Sun's rays are cool in winter. (4) Frogs make noise in the monsoon. (5) Bees sit on lotuses (6) Deer roam about in the forest. (7) Poor men live in cottages. (8) There is snow of the peaks of the Himalayas. (9) No gentleman ever steals.

नवदशः पाठः । Nineteenth Lesson

संबोधनम् – (Vocative)

हे कृष्ण । अहम् त्वाम् भजामि ।

हे राम ! त्वम् विनयेन शोभसे ।
हे कृष्ण ! वयम् त्वाम् नमामः ।
भोः भिक्षुकाः । कुत्र यूयम् गच्छथ ।
हे बाले ! किम् त्वम् उद्यानम् प्रति गच्छसि ।

वार्तालापः

रामः – हे गोपाल ! त्वम् किम् करोषि ।
गोपालः– अहम् पुस्तकम् पठामि ।
रामः – भोः गोपाल ! त्वम् किम् पठसि ।
गोपालः– अहम् संस्कृतभाषाम् पठामि ।
रामः – भोः गोपाल ! कीदृशी संस्कृतभाषा भवति ।
गोपालः– संस्कृतभाषा रुचिरा मनोहरा च भवति ।
रामः – भोः गोपाल ! सा तुभ्यम् रोचते किम् ।
गोपालः– अथ किम् ! मह्यम् अतीव रोचते ।
रामः – भोः गोपाल ! किम् संस्कृतभाषा सुबोधा दुर्बोधा वा ।
गोपालः– संस्कृतभाषा सुबोधा न तु दुर्बोधा ।
रामः – भोः गोपाल । संस्कृतभाषायाः पठनेन किम् लभसे त्वम् ।
गोपालः– संस्कृतभाषायाः पठनेन अहम् ऋषीणाम् ज्ञानकोशम्, विनयम्, विवेकम् च लभे ।

Vocabulary – शब्दकोशः ।

कीदृश-(Adj.) what kind, कैसा.
रुचिर-(Adj.) beautiful attractive सुंदर, मनोहर.
अथकिम्-(ind.) yes, सम्मति.
अतीव-(ind.) very much बहुत
सुबोध-(adj.) easy to understand.
दुर्बोध-(adj.) difficult to understand.
अनध्याय-(M.) holiday, छुट्टी.
भ्रमण-(N.) for walking, roaming.
ऋषि-(M.) sage, मुनि.
ज्ञानकोश-(M.) treasure of knowledge.
भाषा-(F.) language
पठन-(N) study, अभ्यास
सरोवर-(M.) lake
अद्य-(ind.) to-day.

Exercise

(A) Recognise and write the following forms of words.
सरोवरे, भ्रमरैः, मधुराणि, खगाभ्याम्, परोपकाराय, याचकेभ्यः, राम, भ्रमर ।

(B) Give the forms of words demanded.

(1) Vocative Singular :—बाला, सुभद्रा, भूषण ।

(2) Locative Plural :—मेघ, कृषीवल, पर्ण ।

(C) Translate into Sanskrit.

(1) Oh Gopal, people are satisfied by politeness. (2) Oh parrot, why do you not speak ? (3) Oh Girls ! are you cooking ? (4) Oh Rama, why do you not eat ? (5) Oh Radha, where do you move ? (6) Oh Rama, there is aholiday in school to-day. (7) Oh Father, do you go for a walk to-day ?

— व्याकरणम् —

आज्ञार्थः—Imperative

	परस्मैपद			आत्मनेपद		
पुरुषः	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्रथमः	आनि	आव	आम।	ऐ	आवहै	आमहै।
द्वितीयः	०	तम्	त।	स्व	इथाम्	ध्वम्।
तृतीयः	तु	ताम्	अन्तु।	ताम्	इताम्	अन्ताम्।

	भू (I. P.)			लभ् (I. A.)		
प्र. पु.	भवानि	भवाव	भवाम।	लभै	लभावहै	लभामहै।
द्वि. पु	भव	भवतम्	भवत।	लभस्व	लभेथाम्	लभध्वम्।
तृ. पु.	भवतु	भवताम्	भवन्तु।	लभताम्	लभेताम्	लभन्ताम्।

	तुष् (4. P.)			युध् (4. A.)		
प्र. पु.	तुष्याणि	तुष्याव	तुष्याम।	युध्यै	युध्यावहै	युध्यामहै।
द्वि. पु.	तुष्य	तुष्यतम्	तुष्यत।	युध्यस्व	युध्येथाम्	युध्यध्वम्।
तृ. पु.	तुष्यतु	तुष्यताम्	तुष्यन्तु।	युध्यताम्	युध्येताम्	युध्यन्ताम्।

विद् (विन्द्-6. उ.)

प्र. पु.	विन्दानि	विन्दाव	विन्दाम।	विन्दै	विन्दावहै	विन्दामहै।
द्वि. पु.	विन्द	विन्दतम्	विन्दत।	विन्दस्व	विन्देथाम्	विन्दध्वम्।
तृ. पु.	विन्दतु	विन्दताम्	विन्दन्तु।	विन्दताम्	विन्देताम्	विन्दन्ताम्।

चुर् (10. उ.)

प्र. पु.	चोरयाणि	चोरयाव	चोरयाम।	चोरयै	चोरयावहै	चोरयामहै।
द्वि. पु.	चोरय	चोरयतम्	चोरयत।	चोरयस्व	चोरयेथाम्	चोरयध्वम्।
तृ. पु.	चोरयतु	चोरयताम्	चोरयन्तु।	चोरयताम्	चोरयेताम्	चोरयन्ताम्।

Imperative is used to express one's consent, invitation, direcations or advice, curiosity, command and ability.

(1) Consent–अद्य भवान् (you) अत्र आगच्छतु ।
(अनुमति) (you may come here to-day).

(2) Invitation–' अद्य भवान् अत्र भक्षयतु '
(निमन्त्रण) (I request you to take dinner here, to-day).

(3) Direction or Advice–'त्यज दुर्जनसंसर्गं भज साधुसमागम्'
(अनुरोध) Give up contact with wicked persons and seek the company of saintly men.

(4) Blessings :–Go ' गच्छ विजयी भव ' (go and be
(आशीर्वाद) victorious.) ' शिवाः सन्तु ते पन्थानः '
(May your path be full of welfare.)

(5) Request :–' किं करवाणि ते प्रियं देवि ' । (What thing
(प्रार्थना) favourable to you may I perform ?)

(6) Ability :–' सिन्धुमपि शोषयाणि ' I may dry or suck
(सामर्थ्य) the sea.

विंशः पाठः । Twentieth Lesson

(आज्ञार्थः)

(१) त्वम् पाठम् पठ । युवाम् मन्दिरम् गच्छतम् ।
त्वम् पत्रम् लिख । युवाम् कूपस्य जलम् पिबतम् ।
त्वम् जनकम् वन्दस्व । युवाम् जनकस्य चरणौ वन्देथाम् ।
त्वम् चिरम् जीव । युवाम् दाडिमस्य फलानि खादतम् ।
त्वम् गृहम् गच्छ । युवाम् हरिम् सेवेथाम् ।
त्वम् कूपात् जलम् भर । युवाम् क्रीडाङ्गणे कीडतम् ।
यूयम् सूर्यस्य आतपम् सेवध्वम् । यूयम् ओदनम् पचत ।
यूयम् वस्त्राणि धारयत । यूयम् तडागे तरत ।
यूयम् फलानि आनयत । यूयम् रसम् आस्वदध्वम् ।

(२) कमला गीतम् गायतु। सुधा जलम् आनयतु।
किंकरः भारम् वहतु। अश्वः शीघ्रम् धावतु।
गोपालः वाटिकायाः फलानि आनयतु।
तौ पाठशालायाः गृहम् प्रतिनिवर्तेताम्।
ते (बाले) तडागे वस्त्राणि क्षालयताम्।
ते (वनिते) कूपात् जलम् आनयताम्।
तौ बालान् मा ताडयेताम्।
तौ शीघ्रम् क्षेत्रात् इक्षुदण्डान् आनयताम्।
ते कोकिलाः कूजन्तु। ते अज्ञाः मा शोचन्तु।
ते कुक्कुराः मा भषन्तु। ते सिंहाः पञ्जरे मा गर्जन्तु।
ते बालाः शीघ्रम् धावन्तु। ते शुकाः पञ्जरे वदन्तु।
नृपाः सर्वान् लोकान् रक्षन्तु। सज्जनाः दीनान् सेवन्ताम्।

(३) अहम् पुरस्काराय चित्रम् आलिखानि।
आवाम् प्रतिदिनम् दुग्धम् पिबाव।
वयम् शास्त्राणि व्यवहाराय पठाम।
वयम् अध्ययनाय पाठशालाम् शीघ्रम् गच्छाम।
वयम् उपवने विहराम। वयम् संस्कृतभाषाम् शिक्षामहै।
वयम् प्रतिदिनम् प्रातः सूर्योदयात् प्राक् उत्तिष्ठाम।

Vocabulary – शब्दकोशः।

भार–(M.) burden. भार
कूप–(M.) well. कुआँ
चिरम्–(ind) long, बहुत समय तक
दाडिम–(M.) Pomegranate fruit.
भृ–(1. P. भर्) to fill, to pour.
क्रीडाङ्गण–(N.) playground.
वस्त्र–(N.) clothe.

तडाग–(M.) Pond, तालाब.
आ+स्वद्–(1. A. 10 u.) to taste
वह्–(1. P.) to bear, to carry.
इक्षुदण्ड–(M.) Sugarcane, ईख.
शुच् (1. P.) to wail, शोक करना
अज्ञ–(M.) ignorant, अज्ञानी.
भष्–(1. P.) to bark, भसना.

पञ्जर-(N.) cage, पिंजड़ा
सर्व-(Pro.) all, सब.
आ+लिख् (1. P.) to draw a picture, चित्र खींचना। to paint.
प्रतिदिनम्-(ind.) daily, हररोज.
व्यवहार-(M.) dealings of the world.
अध्ययन-(N.) study, अभ्यास.
शिक्ष्-(1. A) to learn, पढ़ना.
प्राक्-(ind.) before, पूर्व.
सूर्योदय-(M) Sun rise.
महानुभाव-(M.) Respectable address of a person.
मा-(ind.) not.
निधान-(N.) treasure.
संतोष-(M.) satisfaction.
नियत-(Adj) alloted.
निधन-(N.) death.
वृद्ध-(M.) old man.
महताम्-of the great people.
एकरूपता-oneness.
पथ्य-(N.) wholesome हितकारक
बल-(M.) Power शक्ति
अनु+स्था-(1. P. तिष्ठ्) to obey, आज्ञा मानना (पाल्).
आज्ञा-(F.) order.
चूष्-(1. P.) to suck, चूसना.
काले काले-at proper times.
वर्ष-(1. P.) to pour down rain

हल-(M.) plough.
घृत-(N) clarified butter.
नृत्य-(N.) dance.
तारा-(F.) Star.
वि+श्रम्-श्राम्-(4. P.) to rest, आराम करना।
आ + चर्-(1. P.) to practise into one's life. आचरना
पर्णशाला-(F.) Cottage, hermitage.
वि+भूष्-(1. 5.) to adorn.
स्वाध्याय-(M.) Self study.
प्र+मद्-माद् (4. P.) to be idle. प्रमाद करना
मातृ-(F.) Mother, माता.
पितृ-(M.) Father. पिता.
अतिथि-(M.) guest.
सर्वत्र-(ind.) every where
प्रधान-(N.) Principal मुख्य.
सम-(Adj.) like, समान.
चिन्ता-(F.) anxiety.
शोषण-(N.) decay.
संपत्तौ-at the time of prosperity.
विपत्तौ-at the time of hardships.
स्वधर्म-one's own duty.
परधर्म-other's duty.
भयावह-(M.) terrific.
क्रिया-(M.) action
अशान्त-(Adj.) unbalanced mind.

सर्वनाम—(Pronoun)

	अस्मद् (सर्व.) I मैं			युष्मद् (सर्व.) You, तू		
पुरुष:	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्रथमा	अहम्	आवाम्	वयम् ।	त्वम्	युवाम्	यूयम् ।
द्वितीया	माम्	आवाम्	अस्मान् ।	त्वाम्	युवाम्	युष्मान् ।
षष्ठी	मम	आवयो:	अस्माकम् ।	तव	युवयो:	युष्माकम् ।

	तद् (M.) He			तद् (F.) She		
प्रथमा	स:	तौ	ते ।	सा	ते	ता: ।
द्वितीया	तम्	तौ	तान् ।	ताम्	ते	ता: ।
षष्ठी	तस्य	तयो:	तेषाम् ।	तस्या:	तयो:	तासाम् ।

Exercise – (अभ्यास:)

(A) Recognise and write the forms given below :

वन्दतु, शिक्षामहै, उत्तिष्ठन्तु, प्रतिनिवर्तेताम्, धारयत, शोभस्व, सेवताम् ।

(B) Put the forms required in the blank spaces of the words given in the bracaket.

(1) हे छात्रा:, सदैव प्रात: सूर्यादयात् प्राक् ——— (उद् + स्था) (2) भो शिष्या:, मा आलस्यं ——— (भज्) (3) हे छात्रा:, विद्याम् अर्थम् च अजरामरवत् ——— (चिन्त्) (4) भो छात्रा: पथ्यम् ——— (सेव्) (5) हे महानुभाव गृहम् ——— (गम्) (6) हे भ्रमरा:, पुष्पेषु रसम् ——— (पा–पिब्).

लेखनम् – Writing :—

(C) Give the 3rd person singular imperative of the following verbs.

भज् , सेव् , शिक्ष् , चिन्त्, धृ (धार्) प्रति + नि + वृत्, हृ, वन्द्.

(D) Translate the following sentences into Sanskrit.

(1) Go to the pond and wash clothes. (2) Go to the field (Playground) and play. (3) Obey the orders of the old people at home. (4) Coo with a tender and sweet voice. (5) Let the horse run quickly. (6) Let Gopal suck mango. (7) Let the king protcet the country by power. (8) Let the cloud pour down rain on occasions. (9) Let the farmer till the fields with a plough. (10) Let the cook boil rice with Ghee. (clarified butter).

Sentences of Good Speech.

सुभाषित–वाक्यानि ।

(१) सत्यं वद (२) धर्मं चर (३) स्वाध्यायात् मा प्रमदितव्यम् (४) मातृदेवो भव । (५) पितृदेवो भव (६) आचार्यदेवो भव । (७) अतिथिदेवो भव (८) गुणाः सर्वत्र पूज्यन्ते । (९) विद्याधनं सर्वधनं प्रधानम् । (१०) लोभः पापस्य कारणम् । (११) विद्यासमं नास्ति शरीरभूषणम् । (१२) चिन्तासमं नास्ति शरीरशोषणम् । (१३) संपत्तौ विपत्तौ च महतामेकरूपता । (१४) सन्तोषः एव पुरुषस्य परं निधानम् (१५) नियतं कुरु कर्म त्वम् । (१६) स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । (१७) ज्ञानं भारः क्रियां विना । (१८) अशान्तस्य कुतः सुखम् ।

---

[२] गद्य–विभागः । (Prose Section)

(१) सूर्योदयः ।

सूर्यस्य उदयात् पूर्वम् उषःकालः भवति। उषःकाले कुकुटाः तारस्वरेण कूजन्ति। ते कूजनेन मुनिवरान् छात्रान् कृषीवलान् च प्रबोधयन्ति। ततः प्रातः षड्वादनसमये सूर्योदयः भवति। सूर्यस्योदयकाले अस्तकाले च आकाशम् रक्तम् भवति। प्रातःकाले विहगाः वने उपवने वाटिकायाम् च गायन्ति। तदा भ्रमराः पुष्पेषु लतासु च गुञ्जन्ति। ते भ्रमराः पुष्पेषु उपविशन्ति रसम् च पिबन्ति। उपवने. वाटिकायाम् च कुसुमानि विकसन्ति। तानि जनानाम् चित्तम् हरन्ति।

सूर्यस्य प्रकाशेन अन्धकारः नश्यति। तदा शीतलः मन्दः सुरभिः च पवनः वहति। जनाः प्रातःकाले सूर्यम् नमन्ति अर्घ्यम् च यच्छन्ति। जनाः सूर्यात् आरोग्यम् सुखम् च लभन्ते।

आदिदेव ! नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर ! नमस्तुभ्यं प्रभाकर ! नमोऽस्तु ते ॥
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्ये नोपजायते ॥

Vocabulary–शब्दकोशः

उदय–(Adj.) rising
पूर्वम्–(ind.) before, पहले
उषःकाल–(M.) dawn, बड़ी सुबह
कुक्कुट-(M.) cook, मुर्गा
तारस्वर–(M.) shrilling voice
मुनिवर–(M) best of sages
प्रबोधयति–to awaken, जगाना
षड्वादन–at six o'clock
अस्तकाल (M.) at the time of setting.
रक्त–(Adj.) red.
बिहग–(M.) bird. पंछी, पक्षी
गुञ्ज्–(I. P.) to buzz.
भ्रमर–(M.) a bee
उपवन–(M.) garden
दिने दिने–Day by day प्रतिदिन
कुर्वन्ति–(कृ) (उ) to do, to perform
उपजायते–(उप + जन्) to be born, उत्पन्न होना ।
वि + कस्–(I. P.) to blossm
हृ–(I. P.) to attract, divert
चित्त–(N.) mind, मन
अन्धकार–(M.) darkness
शीतल–(Adj.) cold, ठंडा
सुरभि–(Adj.) fragrant
अर्घ्य–(N.) offering of water
जन–(M.) man, people. मनुष्य लोग
आरोग्य–(N.) healthy
सुख–(N.) happiness
आदित्य, भास्कर, दिवाकर, प्रभाकर–the epithets of the sun.
प्रसीद–be favourable (प्र + सीद्) प्रसन्न होना.
जन्मान्तर–next birth, दूसरा जन्म
दारिद्र्य–(N.) poverty. गरीबी
सहस्र–(N.) thousand हजार.

: Excrsise :

(A) प्रश्नाः (Questions) :—(1) उषःकाले के कूजन्ति ? कान् प्रबोधयन्ति ? (2) कदा आकाशम् रक्तम् भवति ? किम् कुर्वन्ति भ्रमराः ? (4) के जनानाम् चित्तम् हरन्ति ? (5) कीदृशः पवनः वहति ? (6) जनाः सूर्यात् किम् याचन्ते ?

(B) Make a Sandbi of the words given below. (1) सूर्यस्य + उदयात् (2) च + आकाशम् (3) पुष्पेषु + उपविशन्ति (4) प्रकाशेन + अन्धकार: ।

(C) Give the synonyms (पर्याय शब्दाः) of the following Words.

सूर्य, कुक्कुट, छात्र, कृषीवल, आकाश, वन, उपवन, पुष्प, भ्रमर.

---

(२) शुकः ।

शुकः ग्रामे नगरे वने च वसति। तस्य वर्णः हरितः अस्ति। तस्य मुखम् चञ्चुः अस्ति। तस्य चञ्चोः वर्णः रक्तः अस्ति। शुकस्य ग्रीवा कृष्णा भवति। शुकाय फलानि धान्यबीजानि च रोचन्ते। बालेभ्यः शुकाः अधिकम् रोचन्ते। जनाः शुकान् पञ्जरेषु पालयन्ति। पञ्जरस्थाः शुकाः जनानाम् सुवचनानि दुर्वचनानि च अनुपठन्ति। सज्जनानाम् पण्डितानाम् च गृहेषु ते शुकाः सुवचनानि

अनुपठन्ति । तेन बालाः सुशीलाः भवन्ति । तस्य कलरवाः बालान् जनान् च रञ्जयन्ति । शुकः रमणीयः खगः अस्ति । अतः जनाः तम् पञ्जरे पालयन्ति ।

अखिलेषु विहंगेषु हन्त स्वच्छन्दचारिषु ।
शुक! पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥

Vocabulary—(शब्दकोशः)

शुक-(M.) parrot तोता ।
ग्राम-(M.) village, गाँव.
नगर-(N.) city, शहर
मुख-(N.) mouth, मुंह
चञ्चु-(F.) beak, bill चोंच
ग्रीवा-(F.) neek, गला
कृष्ण-(Adj.) black, काला
अधिक-(Adj.) more, ज्यादा
धान्यबीज-(N.) cornseed,
पञ्जरस्थ-(Adj.) living in a cage, caged
सुवचन-(N.) good speech, अच्छी बानी
दुर्वचन-(N.) bad speech, दुष्ट बानी
अनु + पठ्- to imitate अनुकरण करना
सज्जन-(M.) good person, Gentlman
पण्डित-(M.) learned man,
तेन-so that अतः, उससे.
सुशील-(Adj.) possessing good conduct.
कलरव-(M.) chirping of the bird.
रञ्ज्-(10. u.) to please, खुश करना
पाल्-(10.u.) to tame, to nourish
अखिल-(Pro.) all, सब
हन्त-(Ind.) word of exclamation
स्वच्छन्दचारिन्-moving freely
पञ्जरबन्ध-imprisioned in a cage.
गिरा-(F.) Speech.
मधुर-(Adj.) sweet

Exercise – (अभ्यासः)

(A) प्रश्ना :—(questions) (१) शुकः कुत्र वसति ? (२) तस्य चञ्चोः वर्णः कीदृशः ? (३) शुकाय किम् रोचते ? (४) कुत्र जनाः शुकान् पालयन्ति ? (५) शुकः किम् अनुपठति ? (३) कथम् बालाः सुशीला। भवन्ति ? (७) किम् शुकस्य बालान् जनान् च रञ्जयन्ति ? (८) जनाः शुकान् किमर्थम् पालयन्ति ?

(B) Make Sandbi of the words given below.

(1) मुखम् + अस्ति । (2) ग्रीवा + आरक्तम् । (3) पञ्जरेषु + अनुतिष्ठन्ति । (4) सुवचनानि + अनुपठन्ति ।

(C) Give the synonyms of the following words.

शुक, ग्राम, नगर, मुख, वर्ण, सज्जन, पण्डित, रमणीय, जन, विहंग, गिरा ।

---

(३) कपोतः ।

कपोतः ग्रामे नगरे च वसति । कपोतस्य वर्णः श्वेतः धूसरः च अस्ति । कपोतः फलानि धान्यबीजानि च भक्षयति । जनाः पुण्यार्थम् कपोतेभ्यः धान्यबीजानि यच्छन्ति । कपोतस्य दर्शनम् मंगलकारकम् मन्यते । तस्य दर्शनेन कार्यसिद्धिः भवति । सः शान्त्याः प्रतीकम् अस्ति । जवाहरलालस्य कपोतः अतीव प्रियः आसीत् । सः शान्त्यर्थम् आकाशे कपोतम् उड्डयनाय क्षिपति स्म । सः संदेशवाहकस्य कार्यम् करोति । कपोतः निर्दोषः खगः इति जनाः कथयन्ति । प्रायः कपोताः गृहस्य प्रान्तभागेषु निवसन्ति ।

श्येनभीतः कपोतश्च शिबेरङ्कं समाश्रयत् ।
मनुष्यवाचा श्येनोऽथ राजानं शिबिमब्रवीत् ।
राजन्भक्ष्यमिमं मुञ्च कपोतं क्षुधितस्य मे ।
अन्यथा मां मृतं विद्धि कस्ते धर्मस्ततो भवेत् ।

Vocabulary—(शब्दकोशः)

कपोत-(M.) pigeon, कबूतर
धूसर-(Adj.) grey, मटमैला ।
श्वेत- Adj.) white, सफेद
पुण्यार्थम्-for the sake of religions merit.
दर्शन-(N.) sight.
मंगलकारक-N.) auspicious.
कार्यसिद्धि-(F.) fulfilment of one's purpose.
शान्ति-(F.) peace.
प्रतीक-(N.) symbol चिह्न
मन्-(4.A.) to believe, मानना
जवाहरलाल-a patriot and late prime minister of India.
उड्डयन-flying
स्म-indication of past tense.
संदेशवाहक-(M.) messenger.
कार्य-(N.) function.
निर्दोष-(M.) innocent.
प्रायः-(ind.) generally, सामान्यतः
गृह-(N.) house, घर
प्रान्तभाग-corner, कोना
श्येनभीतः-of the fear of a hawk.
शिबि-(M.) An epithet of a king.
अङ्क-(N.) lap गोद
सम् + आ + श्रि-(1. u) to resort
मनुष्यवाचा-in the speech of a man.
राजा-a king.
अब्रवीत्-(ब्रू इ. प.) told. कहना
भक्ष्य-(N.) food, खुराक eatable
क्षुधित-(Adj.) hungry, भूखा
अन्यथा-(Ind.) otherwise
प्रिय-(Adj.) dear
मृत-(Adj.) dead, मृत्यु
विद्धि-(विद्) know me (माम्)
ततः-(Ind.) then, बाद में
अधः-(Ind.) below, नीचे

Exercise—(अभ्यासः)

(A) प्रश्नो :—(१) कुत्र वसति कपोतः ? (२) किम् भक्षयति कपोतः ? (३) जनाः कपोतेभ्यः किम् यच्छन्ति ? किमर्थम् ? (४) कस्य कपोतः अतीव प्रियः आसीत् ? (५) किमर्थम् सः आकाशे क्षिपति स्म ? (६) कस्य कार्यम् सः करोति ? (७) कुत्र सः निवसति ?

(B) Make sandhi of the following words given below according to their rules.

(१) च + अस्ति । (२) अतीव + आसीत् । (३) आकाशे + उड्डयनाय । (४) प्रान्तभागेषु + उपविशति । (५) क्षिपति + अधः ।

(C) Give synonyms (पर्याय शब्दाः) of the following words :- कपोत, श्वेत, प्रतीक, निर्दोष, श्येन, राजा, क्षुधित, अङ्क.

---

(४) हंसः ।

सर्वेषु खगेषु हंसः श्रेष्ठः । तस्य वर्णः श्वेतः अस्ति । सः सरस्वत्याः वाहनम् अस्ति । अतः सरस्वती हंसवाहिनी इति कथ्यते । प्रायः हंसाः हिमालयस्य समीपे मानससरोवरतटे वसन्ति । हंसाय कमलानि अतीव रोचन्ते । हंसः प्रायः क्षीरात् जलम् विश्लेषयति क्षीरम् च पिबति । अतः हंसः सारग्रहणम् करोति । सः असारम् त्यजति । एवम् सज्जनाः हंसमिव सारग्रहणम् कुर्वन्ति । तस्य गतिः

रुचिरा भवति। वनिताः तस्य गतिम् अनुकुर्वन्ति। सज्जनाः तस्य चरितम् अनुकुर्वन्ति। प्रायः सरोवराणाम् तटेषु हंसाः दृश्यन्ते। ते खगेषु उत्तमाः परमरमणीयाः भवन्ति। ते सरोवरेषु मौक्तिकानि चरन्ति।

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना ॥१॥
हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसो बको बकः ॥२॥

Vocabulary—शब्दकोशः।

हंस–(M.) swan हंस
हंसवाहिनी–(F.) swan rider,
कथ्यते–(Passive of कथ्) it is told
हिमालय–(M.) the mountain Himalayas
उत्तम–(Adj.) best of all
परम–(Adj.) Most श्रेष्ठ
मौक्तिक–(N.) Pearl
चर्–(1. P.) to graze, to eat
राजहंस–(M.) royal swan
मानससरोवर–Manasa lake near Himalayas.
तट–तीर–(M. N.) bank, किनारा तीर.
क्षीर–(N.) milk, दूध
वि+श्लिष् (10. u.) to separate अलग करना
सारग्रहणम्–take the essence.
असार–(M.) useless thing.
कृ–(करोति) to do, करना।
गति–(F.) gait, चाल.
दृश्यन्ते–(passive of दृश्)
शोभा–(F.) beauty, decoration
सरस्–(N.) lake, सरोवर
बक–(M.) crane, stork, सारस
परितः–(ind.) round about, चारो ओर.
वासिना–abode, living, crowd
भेद–(M.) distinction.
विवेक–(M.) discrimination
सरस्वती–(M.) the goddess of learning.
चरित–(N.) act; mode of behaviour and conduct.

Exercise—(अभ्यासः)

(A) प्रश्ना :—(१) सर्वेषु खगेषु कः श्रेष्ठ ? (२) का हंसवाहिनी कथ्यते । (३) कुत्र हंसाः वसन्ति ? (४) किम् हंसः विश्लेषयति ? (५) सज्जनाः किम् कुर्वन्ति ? (६) वनिताः किम् अनुकुर्वन्ति ? (७) ते सरोवरेषु किम् कुर्वन्ति ?

(B) Make the sandhi of the following words.
(१) किम् + अस्ति । (२) सरस्वती + इति (३) कमलानि + अतीव (४) हंसम् + इव (५) खगेषु + उत्तमः (६) सरोवरेषु + उत्तमाः ।

(C) Give the synonyms of the following words :—
हंस, सरस्वती, हिमालय, कमल, क्षीर, सरोवर, मौक्तिक, बक.

---

(५) चतुरः काकः ।

काकः चतुरः खगः अस्ति । एकदा एकः काकः वने इतस्ततः भ्रमति । तदा सः तृषितः भवति । अतः सः जलाय इतस्ततः भ्रमति किंतु कुत्रापि जलम् न लभते ।

कालान्तरेण कृषीवलस्य प्रकोष्ठे सः एकम् घटम् पश्यति। पश्चात् सः घटस्य समीपे गच्छति।

कश्चित्कालम् सः तत्र इतस्ततः भ्रमति। पश्चात् घटस्य मुखे उपविशति। ततः सः घटे स्वल्पम् जलम् पश्यति। सः जलपानाय चञ्चवा प्रयत्नम् करोति। किंतु सः एकम् जलबिन्दुमपि न लभते। तथापि जलपानाय प्रयत्नम् न त्यजति।

ततः सः काकः एकम् उपायम् चिन्तयति। सः पाषाणखण्डानि घटे क्षिपति। ततः घटस्य मुखे जलम् आगच्छति। सः काकः सुखेन पर्याप्तम् जलम् पिबति। सः स्वोद्यमेन अतीव प्रसन्नः भवति।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

Vocabulary – शब्दकोशः।

काक–(M.) a crow, कौआ
एकदा–(ind.) once एक समय
तृषित (adj.) thirsty
कुत्रापि–(ind.) from any where
कालान्तरेण–after some time
प्रकोष्ठ–(N.) court yard, वाडा
पश्चात्–(ind.) after wards
कञ्चित् कालम्–for some time
स्वल्पम्–(adj.) little, somewhat थोडा
सुप्त–(Adj.) sleeping, सोया हुआ
पानाय–for drinking
प्रयत्न–(M.) effort, to try
तथापि–(ind.) yet
बिन्दु–(M.) drop कण
उपाय–(M.) trick
पाषाणखण्ड–(N.) pieces of stones, pebbles कंकड
पर्याप्त–(Ind.) enough काफी
प्रसन्न–(adj.) pleased
सिध्–(4.P.) to accomplish, to achieve प्राप्त करना
कार्य–(N.) affair, work, deed
उद्यम–(N.) hard labour, diligence उद्योग

Exercise—अभ्यासः

(A) प्रश्नोः-(१) किमर्थम् काकः इतस्ततः भ्रमति ? (२) कुत्र सः गच्छति ? (३) घटे सः किम् पश्यति ? (४) घटे सः किम् क्षिपति ? (५) ततः घटस्य जलम् कुत्र आगच्छति ? (६) पश्चात् सः काकः किम् करोति ?

(B) Make Sandhi of the following words.
(१) तदा + एकदा (२) कुत्र + अपि (३) जलाय + इतस्ततः
(४) मुखे + उपविशति (५) स्व + उद्यमेन ।

(C) Give synonyms of the following words :—
काक, तृषित, घट, पाषाण, मनोरथ ।

---

(६) कृतज्ञा पिपीलिका ।

एषः तडागः अस्ति । तडागस्य तीरे एकः वृक्षः अस्ति । एकदा वृक्षस्य शाखायाम् एकः कपोतः उपविशति । तदा एका पिपीलिका वृक्षस्य शाखायाः तडागस्य जले पतति । ततः कपोतः

पिपीलिकाम् जले पश्यति। तदा कपोतस्य हृदये दया उद्भवति। सः करुणया तस्याः समीपे पर्णानि क्षिपति। ततः पिपीलिका पर्णम् आरोहति। तडागस्य तरङ्गाः तत् पर्णम् तीरम् आनयन्ति। पश्चात् पिपीलिका स्वगृहम् गच्छति कपोताय च धन्यवादान् यच्छति।

कालान्तरेण एकदा कपोतः वृक्षस्य शाखायाम् उपविशति। तदा एकः व्याधः तत्र आगच्छति कपोतम् च पश्यति। सः व्याधः कपोतस्य वधाय तत्परः भवति सः स्वतूणीरात् बाणम् निष्कासयति– यदा सः व्याधः कपोतम् प्रति बाणम् लक्ष्यम् करोति। तदा पिपीलिका व्याधम् दशति। दंशस्य पीडया व्याधस्य बाणः लक्ष्यात् स्खलति। ततः कपोतः शाखायाः उत्पतति अन्यत्र च गच्छति।

एवम् पिपीलिका कपोतस्य प्राणान् रक्षति। पिपीलिका प्रत्युपकारेण कृतज्ञा भवति।

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय विभाति सूर्यः परोपकारश्च सदैव कार्यः॥

शब्दकोश—Vocabulary

एतद्–एष–Pro. this यह
एक–(Adj.) one, एक.
पिपीलिका–(F.) ant, चींटी.
हृदय–(N) heart, हृदय.
दया–करुणा–(F.) mercy.
तस्याः–(तद्–F.) her.
समीपे–(ind.) near, नजदीक
आ + रुह्–(1. P.) to ascend.
स्व–(ind.) own, अपना
धन्यवाद–(M.) congratulation
कृतज्ञ–(Adj.) grateful.
प्राण–(M.) soul, life (प्राण– always used in plural)
कार्य–should be done
व्याध–(M.) hunter, शिकारी
वध–(M.) for killing
तत्पर–(ind.) to become ready
तूणीर–(M.) quiver, तरकस
निस् + कास्–(causal) to draw out.

लक्ष्य-(N.) aim
दश्-(1. P.) bite, to काटना
पीडा-(F.) pain, agony. दुःख
स्खल्-(1. P.) to m s the aim, चूक जाना
अन्यत्र-(ind.) else where, दूसरी जगह
एवम्-(ind.) thus, इस तरह।
तरंग-(M.) wave, लहर.
प्रत्युपकार-(M.) to return a benevolent act or in obligation.

अभ्यासः—Exercise

(A) प्रश्ना :—(१) कुत्र कपोतः उपविशति ? (२) कपोतः जले किम् क्षिपति ? (३) के पर्णम् तीरम् आनयन्ति ? (४) एकदा कः तत्र आगच्छति ? (५) ततः सः व्याधः किम् कर्तुम् तत्परः भवति ? (६) पिपीलिका किम् करोति ? (७) कथम् व्याधस्य बाणः लक्ष्यात् स्खलति ?

(B) Make the Sanadhi of the following words.

(१) तीरे + अस्ति। (२) दया + उद्भवति। (३) समीपे + आरोहति। (४) उत्पतति + अन्यत्र। (५) प्रति + उपकारेण।

(C) Give the synonyons of the following words :—

दया, हृदय, तरङ्ग, पर्ण, व्याघ, तूणीर, प्राण, व्याघ।

(D) Fill in the Blank spaces with the proper forms.

(१) ——— पुष्पाणि पतन्ति (लता) (२) ——— नृत्यम् रोचते। (बाला) (३) ताराः आकाशे प्रकाशन्ते। (निशा) (४) ——— पान्थाः विश्राम्यन्ति। (छाया) (५) ——— स्वदेशम् रक्षन्ति। (सेना) (६) सीता ——— पर्णशालाम् विभूषयति। (माला) (७) ——— प्रयागे ——— सह-संगच्छते। (गंगा, यमुना).

———

(७) पत्रवाहकः ।

प्रभा – कः एषः ?

राजीवः– एषः पत्रवाहकः ।

प्रभा – किम् करोति सः ?

राजीवः– सः अस्माकम् जनकस्य पत्राणि आनयति । सः गृहात् गृहम् पत्रवितरणार्थम् गच्छति ।

प्रभा – तस्य दक्षिणे हस्ते किम् अस्ति ?

राजीवः– तस्य दक्षिणे हस्ते पत्राणि सन्ति ।

प्रभा – तस्य वामे हस्ते किम् अस्ति ?

राजीवः– तस्य वामे हस्ते पत्रकोशः अस्ति ।

प्रभा – पत्रकोशे किम् अस्ति ?

राजीवः– पत्रकोशे अन्यपत्राणि सन्ति ।

प्रभा – कुतः पत्रवाहकः पत्राणि आनयति ?

राजीवः– पत्रवाहकः पत्रगृहात् पत्राणि आनयति ।

प्रभा – पत्रगृहे कुतः पत्राणि आगच्छन्ति ?

राजीवः– पत्रगृहे अन्यनगरेभ्यः अन्यग्रामेभ्यः तथा विदेशात् अपि पत्राणि आगच्छन्ति ।

प्रभा – केषाम् पत्राणि आगच्छन्ति ?

राजीवः– मातुलस्य, अन्यसम्बन्धिनाम् तथा मित्राणाम् अपि पत्राणि आगच्छन्ति ।

प्रभा – कथम् तेषाम् पत्राणि आगच्छन्ति ?

राजीवः– ते स्वनगरे ग्रामे वा पत्रपेटिकायाम् पत्राणि क्षिपन्ति । ततः पत्रवाहकः तानि पत्राणि पत्रगृहम् नयति । पश्चात् तैलरथः स्थानकम् पत्राणि नयति ।

प्रभा – किम् अग्निरथः बिदेशमपि पत्राणि नयति ?

राजीव– नहि, नहि । वायुयानम् (विमानः) अग्निनौका वा विदेशम् पत्राणि नयति ।

प्रभा– अहो पत्राणाम् विचित्रा गतिः अस्ति । पत्राणि अग्निरथेन, अग्निनौकया, विमानेन च सर्वत्र संचरन्ति ।

Vocabulary—(शब्दकोशः)

पत्रवाहक–(M.) Postman.
एषः-(एतद्–Pro.) this, यह.
अस्माकम्–(अस्मद्–Pro.) our हमारे
पत्र–(N.) letter, पत्र
वितरण–(N.) to deliver, distribution
दक्षिण–(M.) right, दाया.
वाम-(M.) left, बाया
पत्रकोश-(M.) Post bag,
अन्य-(Pro.) other, दूसरा
कुतः–(ind.) from where कहाँ
गति–(F.) movement.
सम्+चर (1. P.) to move about.
पत्रगृह-(N.) Post office
विदेश-(M.) Foreign Country.
मातुल-(M.) Maternal uncle, चाचा
सम्बन्धिन्-(M.) relative,
कथम्–(ind.) how, कैसे ।
पत्रपेटिका–(F.) letter-box.
तैलरथ-(M.) Motor-car.
स्थानक-(N.) Station, स्टेशन
अग्निरथः-(M.) Railway engine, इंजन
वायुयान–(N.) aeroplane, विमान
अग्निनौका–Ship, जहाज.
विचित्र-(Adj.) strange,
सर्वत्र–(ind.) everywhere

अभ्यास—Exercise

(A) Fill in the blank spaces with proper words :

(1) पत्रवाहकः मातुलस्य ——— आनयति । (2) सः ——— पत्राणि आनयति । (3) पत्राणि ——— ——— तथा ——— अपि प्रत्राणि आगच्छन्ति । (4) तैलरथः ——— पत्राणि नयति । (5) पत्राणि ——— ——— ——— च सर्वत्र संचरन्ति ।

(B) Make sandhi of the words given below :—

(1) पत्राणि + आनयति (2) विचित्रा + अस्ति । (3) किम् + अस्ति ।

(C) Give the synonyms of the following words.
पत्र, विमान.

---

(८) शरीरस्यावयवाः ।

मनुष्यशरीरस्य विविधाः अवयवाः सन्ति। जनाः प्रधानतया ज्ञानेन्द्रियैः कर्मेन्द्रियैः च विविधानि कार्याणि कुर्वन्ति।

(अ) ज्ञानेन्द्रियाणि।

शीर्षम्—शीर्षम् शरीरस्य उत्तमाङ्गम् इति जनाः कथयन्ति। यतः तत् सर्वेषु अवयवेषु उत्तममस्ति। शीर्षे केशाः शोभन्ते। केशानां वर्णः कृष्णः अस्ति।

कर्णः—शीर्षस्य अधः द्वयोः पार्श्वयोः द्वौ कर्णौ स्तः। जनाः कर्णाभ्याम् सुवचनानि दुर्वचनानि संगीतम् विविधप्रकारान् शब्दान् च आकर्णयन्ति।

नेत्रम्—ललाटस्य अधः भागे नेत्रे स्तः। नराः नेत्राभ्याम् विविधान् पदार्थान् पश्यन्ति।

नासिका—नेत्रयोः मध्ये नासिकास्ति। जनः नासिकया गन्धम् जिघ्रति।

रसना—नासिकायाः अधोभागे मुखमस्ति। मुखे रसनास्ति। रसनया जनाः विविधानि भोजनान्यास्वादन्ते। मुखे दन्ताः सन्ति। जनाः दन्तैः अन्नम् चर्वन्ति।

त्वचा—शरीरे सर्वत्र त्वचा वर्तते। तस्याः कार्यम् स्पर्शः। जनाः त्वचया शीतोष्णकोमलकठिनादि स्पर्शभावान् अनुभवन्ति।

(ब) कर्मेन्द्रियाणि।

हस्तौ—जनस्य द्वौ हस्तौ स्तः। दक्षिणः हस्तः वामः हस्तः च। जनः हस्ताभ्याम् यच्छति, गृह्णाति च। जनः हस्तेन लिखति, सेवाम् च करोति। हस्तयोः अञ्जलिः भवति। जनः अञ्जलिनाचार्यान् देवान् वृद्धान् च नमति। अञ्जलौ पुष्पाणि सन्ति। जनः पुष्पैः देवम् पूजयति।

चरणौ–जनस्य दक्षिणः वामः च चरणौ स्तः । जनाः चरणाभ्याम् चलन्ति खेलन्ति विहरन्ति च । जनाः पादत्राणाभ्याम् चरणौ रक्षन्ति ।

मुखम्–मुखे रसना वर्तते । जनाः रसनया वदन्ति ।

पुरुषाः वनिताः च विविधैः भूषणैः स्वदेहम् भूषयन्ति तथा विविधवर्णानि वस्त्राणि धारयन्ति । वनिताः स्वकेशान् पुष्पैः अलङ्कारः च भूषयन्ति । पुरुषाः स्वमस्तकयुष्णीषम् धारयन्ति । कर्णौ कुण्डलाभ्याम्, नासिकां मौक्तिकेन, नेत्रे अञ्जनेन, कण्ठम् हारेण, हस्तम् कङ्कणेन, अङ्गुलिम् मुद्रिकया, कटिम् मेखलया, चरणौ नूपुराभ्याम् च एवं वनिताः विविधैः अलङ्कारैः स्वावयवान् भूषयन्ति ।

हस्तस्य भूषणं दानं, सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं, भूषणैः किम् प्रयोजनम् ॥

शब्दकोशः — Vocabulary

अवयव–(M.) limbs of the body
ज्ञानेन्द्रिय–(N.) sense of perception.
कर्मेन्द्रिय–(N.) sense of action
प्रधान–(Adj.) main, chief
शीर्ष–(N.) head, सर, मस्तक
उत्तमाङ्ग–(N.) best part of the body
यतः–(ind.) because of क्योंकि
केश–(M.) hair बाल
अधः–(ind.) below, down नीचे
पार्श्व–(M.N.) side
संगीत–(N.) music
ललाट–(M.) forhead, कपाल
पदार्थ–(M) thing, material
गन्ध–(N.) smell,
रसना–(F.) tongue, जीभ
भोजन–(N.) dinner
आ + स्वद् (1.A.) to taste
दन्त–(M.) tooth
चर्व्–(1.P.) to chew
घ्रा–जिघ्र–(1.P.) to smell
त्वचा–(F.) skin
स्पर्श–(M.) touch

शीत-(adj.) cold, ठंडा

उष्ण-(adj.) hot, गर्म

कोमल-(Adj.) tender

कठिन-(Adj.) hard सख्त

भाव-(M.) feeling

अनु + भू-(1 P.) to experience

ग्रह - गृह्-(9.P.) to accept, to take, ग्रहण करना।

अञ्जलि-(F.) cavity made by joining hands, hollow hand

पादत्राण-(N.) shoe, जूता

विविधवर्ण-(Adj.) variegated colour

कटि-(F.) waiste कमर

मेखला-(F.) girdle, रशना

अलङ्कार-(M.) ornament, भूषण

उष्णीष-(N.) turban, पगडी

मौत्तिक-(N.) pearl, मोती

नासिका-(F.) nose, नाक, घ्राण

कण्ठ-(N.) neck, गला

अङ्गुलि-(F.) finger

मुद्रिका-(F.) ring अंगूठी

नूपुर-(N.) anklet, पाजेब

प्रयोजन-(N.) purport use, हेतु

श्रोत्र-(N.) ear, कान.

(A) प्रश्नाः (१) वनिताः पुष्पैः किम् भूषयन्ति ? (२) जनाः कर्णाभ्याम् किम् कुर्वन्ति ? (३) रसनया जनाः किम् कुर्वन्ति ? (४) जनाः त्वचया किमनुभवन्ति ? (५) अञ्जलिना जनः किम् करोति ? (६) पुरुषाः स्वमस्तके किम् धारयन्ति ?

(B) Seperate the Sandhi of the following words ?

(१) अवयवेषूत्तमम् (२) नासिकास्ति। (३) भोजनन्यास्वादन्ते। (४) अञ्जलिनाचार्यान् (५) स्वमस्तकयुष्णोषम्।

(C) Give the Synonyms of the following words :—

शीर्ष, केश, कर्ण, नासिका, रसना, नूपुर, कङ्कण, मुद्रिका, मेखला.

(९) अजशृगालयोः ।

एकदा तृषितः शृगालः जलम् पातुम् कूपे पतति । सः इतस्ततः कूपे उत्पतति किन्तु सः कूपात् बहिः न निर्गच्छति । सः साहाय्यार्थम् वारंवारमाक्रोशति । अत्रान्तरे कश्चित् अजः कूपस्य समीपे आगच्छति । सः कूपस्य तले शृगालम् पश्यति । अजः पृच्छति–'अपि कूपे मधुरम् जलम् वर्तते'। शृगालः प्रतिवदति 'न तु केवलम् मधुरम् जलम् किन्तु पीयूषमिव च वर्तते ।' अहम् पुनः पुनः पिबामि किन्तु ममेच्छा पानात् न निवर्तते । ततः अजः कूपे अवतरति जलम् पिबति च । ततः शृगालः प्रथमम् तस्य पृष्ठमारोहति पश्चात् तस्य शृङ्गौ आरुह्य च कूपात् बहिः निर्गच्छति । ततः अजः जले मज्जनोन्मज्जनं कृत्वा म्रियते ।

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥

शब्दकोश — Vocabulary

शृगाल-(M.) fox, सियार.

अज-(M.) goat, sheep.

पातुम्-(पिब्) for drinking, जल पीनेके लिये ।

उद् + पत्-(1.P.) to jump.

निर् + गम्-to come out, बाहर आना ।

साहाय्य-(M.) help, मदद.

तल-(M.) lower part नीचेका भाग

अपि-indicates question in the beginning of the sentence.

वृत्-(1.A.) to be, होना.

प्रति + वद्-to reply, जवाब देना

पीयूष-(N.) nectar, अमृत

नि + वृत्-to return, to satisfy

अव + तृ-(1.P.) to descend, नीचे उतरना

प्रथम-(adj) first, पहला

पृष्ठ-(N.) back part

आ + रुह्-(1.P.) to ascend

आरुह्य-ascending

शृङ्ग-(M.) horn सींग peack.

मज्जनोन्मज्जन:-diving and coming out of the water

मृ-(म्रिय्-1.A.) to die, मरना.

प्रियवादी-sweet speaking अच्छा कहना ।

मधु-(N.) sweetness, honey.

जिह्वाग्र-at the tip of the tongue

हलाहल-विषम्-(N.) deadly poison तीव्र जहर

हृद्-(N.) heart, हृदय.

Exercise — अभ्यास

(A) प्रश्नाः (१) एकदा तृषितः शृगालः कुत्र पतति ? किमर्थम् ? (२) कूपे सः किम् करोति ? (३) अत्रान्तरे कः तत्र आगच्छति ? (४) अजः किम् पृच्छति ? (५) शृगालः किम् प्रतिवदति ? (६) शृगालः कथम् बहिः निर्गच्छति स्म ? (७) ततः अजस्य किम् भवति ?

(B) Separete the Sandhi of the following words :—
(१) सहाय्यार्थम् (२) पीयूषमिव (३) मज्जनोन्मज्जनः । (४) पृष्ठमारोहति ।

(C) Give the synonyms of the following words :—
अज, शृगाल, पीयूष, शृङ्ग, विष, कूप, मधुर.

[३] पद्य-विभागः । Poetry Section

बालसुभाषितानि ।

(१) अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रम् अमित्रस्य कुतः सुखम् ॥

(२) सुखार्थी त्यजते विद्यां विद्यार्थी त्यजते सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥

(३) विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।
व्याधितस्यौषधम् मित्रम् धर्मो मित्रम् मृतस्य च ॥

(४) पुस्तकस्था तु या विद्या परहस्तगतम् धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम् ॥

(५) रूपयौवनसम्पन्नाः विशालकुलसम्भवाः ।
विद्याहीनाः न शोभन्ते निर्गन्धाः किंशुका इव ॥

(६) पादपानां भयम् वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयम् वज्रात् साधूनां दुर्जनाद् भयम् ॥

(७) विद्या ददाति विनयम् विनयाद् याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ॥

(८) नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः ।
नास्ति रागसमम् दुःखम् नास्ति त्यागसमं सुखम् ॥

(९) यौवनम् धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

(१०) मात्रा समं नास्ति शरीरपोषणम्,
चिन्तासमं नास्ति शरीरशोषणम्, ।
मित्रं विना नास्ति शरीरतोषणम्,
विद्यां विना नास्ति शरीरभूषणम् ॥

(११) नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥

(१२) अतिदानात् बलिर्बद्धः अतिमानात् सुयोधनः ।
विनष्टो रावणो लौल्यात् अति सर्वत्र वर्जयेत् ॥

(१३) उदारस्य तृणं वित्तं, शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या, निस्पृहस्य तृणं जगत् ।।

(१४) स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ।।

(१५) कोकिलानां स्वरो रूपं स्त्रीणां रूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ।।

(१६) वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम् ।
वृथा च धनिके दानं दारिद्र्ये यौवनं वृथा ।।

(१७) भार्या मित्रं गृहस्थानां विद्या मित्रं प्रवासिनाम् ।
रोगिणामौषधं मित्रं धर्मो मित्रं शरीरिणाम् ।।

(१८) सर्वेऽपि सुखिनः सन्तु, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु न कश्चिद् दुःखमाप्नुयात् ।।

(१९) अष्टादशपुराणानां सारो व्यासेन कीर्तितः ।
परोपकारः पुण्याय पापाय परपीडनम् ।।

(२०) प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।

(२१) मुखं पद्मदलाकारं वाणी चन्दनशीतला ।
हृदयं क्रोधसंरक्तं त्रिविधं धूर्तलक्षणम् ।।

(२२) रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ।।

(२३) विरला जानन्ति गुणान् विरलाः कुर्वन्ति निर्धने स्नेहम्
विरलाः परकार्यरताः परदुःखेनापि दुखिता विरलाः ।।

(२४) दरिद्रता धीरतया विराजते, कुरूपता शीलगुणेन राजते ।
कुभोजनं चोष्णतया विराजते, कुवस्त्रता शुभ्रतया विराजते ।।

(२५) विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ।।

Vocabulary—(शब्दकोशः)

(1) अलस-(M.) Lazy, कुतः (ind.) how. अमित्रस्य, अधनस्य, अविद्यस्य, the prefix अ connotes negative sense. (2) सुखार्थिन्- one who seeks pleasure, a happy man. (3) प्रवास (M.) travelling, व्याधित (Adj.) having a disease. Patient, रोगी, औषध (N.) medicine; धर्म (M.) religious merit; मृत-(adj.) dead man; (4) पुस्तकस्था-in the book, पर-(Adj.) other, कार्यकाले समुत्पन्ने when the hour of need arises, that knowledge and wealth become useless. (5) रूपयौवनसम्पन्नाः-endowed with beauty and youth and born of great families, न शोभन्ते-do not make any figure in the world-like the scentless किंशुक plant. (6) पादप-a tree, वात wind पद्म-lotus, शिशिरे (M.) winter वज्र (M. N.) thunderbolt. (7) ददाति-(२.प.) gives, promotes, पात्रता worthiness, आप्नोति-obtain. (8) समम् (ind.) equal to, likes; चक्षुस् (N.) eye.; राग-attachment. (9) धनसम्पत्तिः-possession of riches, प्रभुत्वम्-power and pelf, अविवेकता-thoughtlessness, एकैकमप्यनर्थाय-each one leads to calamity, how much more calamitous will the collection of four ? (चतुष्टयम्). (10) There is no nourishment (पोषण) like mother. शोषण-(N) decay, anxiety, तोषणम्-satisfaction. भूषणम्-adornment (11) आभरण-(N) ornament. क्षमा-forgiveness. (12) The king बलि-is bound by donating excessirely (अतिदानात्) मान-respect pride, विनष्ट-perished by greed, वर्जयेत्-should be abandoned every where. (13) wealth is straw (तृणम्) (उदार) generous man शूर-(M.) (a brave man), मरण-(N.) death, विरक्त-renounced, निस्पृहस्य-desireless, जगत्-(N.) world. (14) पूज्यते-is worshipped. (15) स्वर-sound, voice, पतिव्रतम्-Faith fulness towards one's huband is the beauty of women (स्त्रीणाम्), कुरूपा-ugly person. तपस्विन्-ascetic, (16) Rainfall (वृष्टिः) is futile (वृथा), तृप्त-fully satisfied. दारिद्र्य-Poverty. (17) गृहस्थ-(M.) house holder, प्रवासिन्-(M.) traveller. (18) I

wish all will be happy, निरामय-healthy, free from diseases, भद्र-(N.) welfare, good, न कश्चिद्-No body. (19) अष्टादश पुराण (M.) of Eighteen ancient epics, the great Poet Vyas told the essence (substance), पुण्य-(N.) holy merit, परपीडनम्-to afflict others. (20) In the first stage knowledge is not obtained (अर्जिता), करिष्यति-what will he do. (21) पद्मदलाकारम्-like the petals of a lotus (beautiful), speech (वाणी) is cool like a sandle paste, heart is full of anger, three fold characteristics of a villain (धूर्तलक्षणम्) (22) राजमणि:-a jewel among kings, रमेशम्-the lord of Rama (Laxmi, seeta), killed (अभिहता) the army of demons (निशाचरचमू), there is no other. better refuge (परायणं) than Rama, दास:-servant, चित्तलय:-absorption of mind, (भो) भो-Oh Rama, उद्धर-lift me (from the mundane world) (23) विरल-(Adj) scarce appreciate (जानन्ति), निर्धन-poor. परकार्यरता:-absorbed in doing good benevolnet acts, दु:खिता-suffered by other's grief. (24) विराजते-adorned by forbearance, कुभोजनम्-stale food can be made fresh by being heated, कुवस्त्रता-bad clothing. शुभ्रतया-whiteness. (25) विवाद-controversy मद-(M.) Pride. परेषाम्-of others, विपरीतम्-reverse of the good persons.

---

[४] गीता विभागः । (Geeta Section)

(१) वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

I bow down to Krishna, the God, the son of Vasudeva, the destroyer of Kansa and Chanura, the transcedental joy of Devaki and the preceptor of the world.

(२) सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

All the Upanishads are like cows, the milkman is the joyful leader of the cowherds, Partha (Arjuna) is the calf,

a man of good intellect is its enjoyer, Geeta is the milk in the form of great nectar.

अथ प्रथमोऽध्यायः । (First Canto)

धृतराष्ट्र उवाच—Dhritrashtra said—

(१) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सजय ।। १ ।। १ ।।

Oh Sanjaya ! My sons as well as the sons of Pandu desiring to fight a battle assembled in Kurukshetra, the field of war of righteousness. What did they do there ? (1–1)

अर्जुन उवाच—Arjuna said—

(२) दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।। १ ।। २८।।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।। १ ।। २९ ।।

Oh Krishna, seeing my own relative, wishing to fight and standing (before me), my limbs sink down and my mouth is dried up. There is a tremor in my body and my hairs stand on end. (1–28,–29)

(३) गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।। १ ।। ३० ।।

My bow Gandiva slips down from my hand and skin begins to burn, nor can I stand steadily and my mind becomes distracted. (1–30)

(४) इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।। ४ ।। १ ।।

I (God) Spoke of this immortal Yoga (Science of discipline and knowledge) to Vivasvat (Sun), Vivasvat spoke of it to Manu (the author of Smriti) and Manu then spoke of it to Ikshvaku (the king). (4–1)

(५) एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ ४ ॥ २ ॥

Thus this yoga arises (is obtained) from tradition. All king sages know of it. After a long lapse of time, it is more or less disappeard, Oh ! Killer of the enemies. (परंतप) (4-2)

(६) बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ४ ॥ ५ ॥

Many of my births and yours too, Oh Arjuna, have passed. I know all of them. You, oh killer of enemies, do not know it. (4-5)

(७) यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ४ ॥ ७ ॥

Whenever righteousness declines, Oh son of Bharat, and when unrighteousness prevails; I create myself in an incarnation. (4-7)

(८) परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ४ ॥ ८ ॥

To protect the (righteous) saintly men and to destroy the wicked evil-doers. I am born in every age to re-establish faith. (4-8)

(९) जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ४ ॥ ९ ॥

He who knows my divine birth and deeds in reality does not have rebirth, after leaving his body. Oh Arjuna, he comes to me. (4-9)

(१०) ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ४ ॥ ११ ॥

These who approach me in particular fashion, I attain them in that very fashion. All men. Oh partha ! follow my path from all sides. (4-11).

(११) चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्धयकर्तारमव्ययम् ॥ ४ ॥ १३ ॥

अक्रीडन्, अवसम्, अभाषन्त, अगायत्, पादुरभवत्, व्यापादयत्, अस्वादयन्, अलभामहि, अडयन्त, अचोरयताम्, अकम्पन्त, न्यमन्त्रयत्.

(B) Give the forms of the Imperfcet Past Tense as required below :—

(१) प्र. पु. द्वि. व. : क्रीड्, रच्, लभ् ।

(२) द्वि. पु. ए. व. : स्वाद्, नि + मन्त्र्, वि + आ + पद्, कम्प् ।

(३) तृ. पु. ए. व. : नि + वृत्, गै, जि, रच् ।

लेखनम्—Writing

(C) Translate into Sanskrit :—

(1) Many kings attended (came to) the Swayamvara of Seeta. (2) We released (मुच्) the bird from the cage. (3) Rama ran after deer. (4) Poets sang verses in the King's Court (सभा). (5) Sages preached their pupils in their hermitage in ancient times. (6) The Brahmins drank the waters of the river Ganges. (7) Wise men were pleased with the prosperity (समृद्धि) of their friends. (8) When did the spies return ? (9) Children were playing in the street. (10) The waters of the rivers spread. Over the fields. (11) I struck (ताड्) the thief with a stick. (12) When did your begin your work ? (13) The waters of the pond were dried by the heat of summer. (14) You two went out quickly. (15) The enemies fought much with you in the battle.

(D) Fill in the blank spaces with the forms of Imperfect Past Tense.

(१) पुरा यूयम् अनेन मार्गेण मुम्बापुरीम् ——— । (गम्) (२) त्वम् नगर्याः कदा ——— । (नि + वृत्) (३) यदा कर्कोटकः नागः नलम् ——— तदा नलस्य देहः कृष्णः ——— । (दंश्, भू) (४) वाल्मीकेः आश्रमस्य समीपे लक्ष्मणः सीताम् ——— । (त्यज्) (५) सिंहात् भीताः मृगाः इतस्ततः ——— । (धाव्) (६) मेघः

वारिणा महीम् ——— । (सिञ्च्) (७) गङ्गायाः शीतलमुदकम् वयम् यथेष्टम् ——— । (पा) (८) अहम् नृपस्य कृपाम् ——— । (अप + ईक्ष्) (९) युवाम् गृहात् बहिः शीघ्रम् ——— (निर् + गम्) (१०) वयम् बहूनि फलानि वृक्षस्य शाखायाम् ——— । (दृश्)

(E) Join the words given below making sandhi :

(१) कन्दुकैः + अक्रीडन् । (२) रामः + ज्येष्ठः । (३) मूषकाः + गृहे । (४) कपोताः + आकाशे । (५) कश्चिच्चोरः + वैश्यः । (६) नृपः + ब्राह्मणान् । (७) कर्कोटकः + नागः । (८) वाल्मीकेः + आश्रमस्य । (९) मृगाः + इतस्ततः ।

(F) Give the synonyms of the following words :
शिशु, नीड, सिंह.

षड्विंशः पाठः ।

Lesson Twenty Sixth

विध्यर्थः—Potential Mood

(1) Injunction, Possibility, Question, Propriety, Swearing, Counsel, Desire etc. are expressed in Sanskrit by the Potential Mood.

(1) Injunction (विधिः) :—ब्रह्मचारी मधु मांसं च वर्जयेत् । A Bhrahmachari (Student) Should avoid wine and meat.

(2) Possibility (संभावना):—संभाव्येऽद्य अनिलः आगच्छेत् । There is a possibility that Anil would come.

(3) Question (संप्रश्न):—किमहं पठेयम् उत क्रीडेयम् । whether I should learn or play.

(4) Propriety (औचित्य) त्वम् साधून् सेवेथाः। (you should serve saints).

(5) Swearing (शपथ) यः माम् राक्षसः इति कथयति तस्य नाशः भवेत्। He who calls me a demon he will surely die.

(6) Counsel (उपदेश):—सत्यं वदेत्। धर्मम् चरेत्। Speak truth and practise religious merit.

(7) Desire (इच्छा) : भवान् शीघ्रम् नीरोगः भवेत्। I wish you will be free from disease soon.

Terminations of the Potential Mood

	परस्मैपद			आत्मनेपद		
पुरुष।	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व,
प्र, पु.	ईयम्	ईव	ईम।	ईय	ईवहि	ईमहि
द्वि. पु.	ईः	ईतम्	ईत।	ईथाः	ईयाथाम्	ईध्वम्।
तृ. पु.	ईत्	ईताम्	ईयुः।	ईत	ईयाताम्	ईरन्।

परस्मैपद				आत्मनेपद		
वस् (1. P.) to dwell				लभ् (1 A.) to get		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र. पु.	वसेयम्	वसेव	वसेम ।	लभेय	लभेवहि	लभेमहि ।
द्वि. पु.	वसेः	वसेतम्	वसेत ।	लभेथाः	लभेयाथाम्	लभेध्वम् ।
तृ. पु.	वसेत्	वसेताम्	वसेयुः ।	लभेत	लभेयाताम्	लभेरन् ।
कुप् (4. P.) to be angry				विद् (4. A.) to be, (is, are)		
प्र. पु.	कुप्येयम्	कुप्येव	कुप्येम ।	विद्येय	विद्येवहि	विद्येमहि ।
द्वि. पु.	कुप्येः	कुप्येतम्	कुप्येत ।	विद्येथाः	विद्येयाथाम्	विद्येध्वम् ।
तृ. पु.	कुप्येत्	कुप्येताम्	कुप्येयुः ।	विद्येत	विद्येयाताम्	विद्येरन् ।
कृष् (6. U.) to till				कृष् (6. U.) to till.		
प्र. पु.	कृषेयम्	कृषेव	कृषेम ।	कृषेय	कृषेवहि	कृषेमहि ।
द्वि. पु.	कृषेः	कृषेतम्	कृषेत ।	कृषेथाः	कृषेयाथाम्	कृषेध्वम् ।
तृ. पु.	कृषेत्	कृषेताम्	कृषेयुः ।	कृषेत	कृषेयाताम्	कृषेरन् ।
तुल् (10. U.) to weigh.				तुल् (10. U.) to weigh.		
प्र. पु.	तोलयेयम्	तोलयेव	तोलयेम ।	तोलयेय	तोलयेवहि	तोलयेमहि ।
द्वि. पु.	तोलयेः	तोलयेतम्	तोलयेत ।	तोलयेथाः	तोलयेयाथाम्	तोलयेध्वम् ।
तृ. पु.	तोलयेत्	तोलयेताम्	तोलयेयुः ।	तोलयेत	तोलयेयाताम्	तोलयेरन् ।

(१) वस् + अ + ईयम् = वस + ईयम् = वसेयम् । (अ + ई = ए)
(२) कुप् + य + ईयम् = कुप्य + ईयम् = कुप्येयम् ।
(३) कृष् + अ + ईयम् = कृष + ईय = कृषेयम् ।
(४) तुल् – तोल् + अय + ईयम् = तोलयेयम् ।

दम्पती गृहे अग्निम् पूजयेताम् ।

यत्र जलम् न विद्यते तत्र न निवसेत् ।
रज्जुम् सर्पम् न मन्येत । खलैः कदापि न संगच्छेत ।
प्रजानाम् अनुरञ्जनाय नृपाः यतेरन् ।
विपत्तौ धीरः न मुह्येत् धर्मम् वा न परित्यजेत् ।
विपदर्थे धनम् रक्षेत् दारान् रक्षेद्धनैः अपि ।
यद्यहम् धनम् लभेय तर्हि काश्मीरम् गच्छेयम् ।

गगनात् भानुः अपि पतेत् शीतलः च भवेत् न तु मम वचनम् विफलम् भवेत् ।

विषमप्यमृतं क्वचिद्भवेत् अमृतम् वा विषमीश्वरेच्छया ।
जनाः प्रातःकाले स्नानम् पूजाम् च समाचरेयुः ।
रणम् गताः सैनिकाः प्रतिनिवर्तेरन् न वा ।
यदि त्वम् असत्यम् वदेः तर्हि त्वाम् अधिपतिः दण्डयेत् ।
यः सदाचारेण जनकम् प्रीणयेत् सः पुत्रः ।
छात्राः दत्तचित्तेन अध्ययनम् कुर्युः ।
आश्चर्यमधुना अन्धाः लिखेयुः पठेयुः च ।
शयनात् पूर्वम् यूयम् पाठान् स्मरेत् ।
यदि त्वम् कृष्णम् भजेः तर्हि त्वम् स्वर्गम् गच्छेः ।

यदि सः उपवासम् कुर्यात् तर्हि रोगेभ्यः मुञ्चेत् ।
लालयेत्पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत् ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ॥
तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
न हि रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥

Vocabulary शब्दकोशः ।

विद् + (4. A.) to exist, to be
सम् + गम्–(1. A.) to go together, to associate, to keep the company
प्रजा–(F.) subject,
अनुरञ्जन–(N.) delight, pleasure
मुह्–(4. P.) to captivate, to be silly, to be deluded
विपद्–विपत्ति–(F.) difficulty, hardship, कठिनाई
दार–(M.) wife, (always used in plural)
वचन–(N.) word, शब्द
विफल–(N.) futile, निष्फल
अमृत–(N.) nectar
ईश्वरेच्छा–(F.) God's desire
सम् + आ + चर्–to practise, to do, to behave
अधिपति–(M.) Master, स्वामी
सदाचार–(N.) good behaviour
दत्तचित्त–(N.) with an attentive mind
आश्चर्य–(Adj) wonderful
शयन–(N.) bed, sleeping
उपवास–(M.) fast, अनशन
कुर्यात् (कृ)–to do
लल्–(10. u.)–to caress, to show indulgence
वर्ष–(N.) year
षोडश–(Adj.) sixteen सोलह.
प्राप्त–(P. P.) attained,
एतद्–(Pro.) this, यह
प्रसूत–(P. P. Adj.) Born,
सकाश–(N.) Proximity, from
अग्रजन्मन्–(M.) Brahmin, those who are born earlier.
चरित्र–(N.) conduct, way of living.
सस्य–(N.) corn, अनाज
लोक–(M.) people, लोग
स्था–तिष्ठ–to live, to stay.

उप+ईक्ष्-(1. A.) to disegard to be indifferent.
सेव्-(1. A.) to be in company of
अधम-(Adj.) low person,
उत्तम-(Adj.) best person,
कारण-(N.) cause, हेतु
अव+मन्-(4. A.) to disregard तिरस्कार करना (अव + गण्)
गमन-(N.) going away, जाना.
स्यात् (अस्-Potential).
अव+गाह्-(I.A.) to bathe, स्नान करना।
अल्प-(Adj.) little, थोड़ा.
उन्मत्त-(Adj.) arrogant.
वृद्ध-(Adj.) elder, old man
अपाय-(M.) pain, हानि
न्यायशास्त्र-(N.) science of logic, तर्कशास्त्र.
राज्यतन्त्र-(N.) government.
आ+दृ (द्रिय्-6. A.) to respeet, मान देना.
उत-(Ind.) or, अथवा.
रज्जु-(M.) rope, रस्सी.
अध्वखेद-(M) fatigue of travelling, थकावट.
द्रुह्-(4. P.) to envy, act as a traitor द्रोह करना.
सुचरित्र-a man of good conduct.
भागीरथी-(F.) other name of the river Ganges.
धीर-(M.) steadfast person.

अस्-(2. u. विध्यर्थ)

	परस्मैपद			आत्मनेपद		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र. पु.	स्याम्	स्याव	स्याम।	सीय	सीवहि	सीमहि।
द्वि. पु.	स्याः	स्यातम्	स्यात।	सीथाः	सीयाथाम्	सीध्वम्।
तृ. पु.	स्यात्	स्याताम्	स्युः।	सीत	सीयाताम्	सीरन्।

: स्वाध्याय :

(A) Recognise the forms given below :
यतेरन्, गच्छेयम्, समाचरेयुः, प्रतिनिवर्तेरन्, दण्डयेयम्, कुर्युः, स्मरेत्, मुञ्चेः, परित्यजेः, शिक्षेरन्।

(B) Give the required forms of the verbs mentioned below :
विध्यर्थ प्र. पु. ब. व. :-तड् (ताड्), प्रति+नि+वृत्, स्था (तिष्ठ) भू (भव्), शिक्ष्, सम् + आ + चर्।
विध्यर्थ द्वि. पु. द्वि. व. :-प्रोण्, पठ्, स्मृ (स्मर्)।
विध्यर्थ तृ. पु. ब. व. :-दण्ड्, गम् (गच्छ्), मन्।

(C) Translate into Sanskrit Sentences.

(1) We should not disregard a disease or an enemy. (2) We should be in company (सेव्) of best people, not mean fellows. (3) We should give money to the poor people. (4) What may be the cause of his going away. (स्यात्) (5) Warriors should not retreat from the field of battle. (6) A man should not give up patience even when in trouble. (7) You should obey the order of elders. (आज्ञया वृत्) (8) Man should always bathe in the morning and should perform worship. (9) A foolish person is pleased even with a small thing. (10) Arrogant people do not respect elders.

(D) Fill in the blank spaces with the proper forms :

(१) पुत्राः सुचरितैः पितरौ ——— । (प्रीण्)

(२) किम् त्वम् नृत्यम् उत गानम् ——— । (शिक्ष्)

(३) यूयम् रज्जुम् सर्पम् न ——— । (मन्)

(४) पण्डितानाम् समाजे मूर्खाः मौनम् ——— (भज्)

(५) कुसुमैः सुरभिण्युद्यानेऽध्वखेदम् युवाम् ——— (नी)

(६) सुचरित्राय नृपतये जनाः न ——— । (द्रुह्)

(७) यदा त्वम् गृहम् ——— तदा हस्तौ पादौ च ——— ।
(प्रति + नि + वृत्, क्षल्)

(८) यदि त्वम् विषम् भक्षयेः तर्हि ——— । (मृ–म्रिय्)

(९) तौ गुरोः सकाशात् न्यायशास्त्रम् ——— (पठ्)

(१०) राज्यतन्त्राणि प्रजाः अपायात् ——— । (रक्ष्)

(११) इच्छामि पुनरपि सीता पुण्याम् भागीरथीम् ———
(अव + गाह्)

(E) Make the Sandhi of the following words :

(१) नृपाः + यतेरन् । (२) धीरः + न । (३) शीतलः + भवेत् । (४) वदेः + तर्हि । (५) अधिपतिः + दण्डयेत् । (६) भोः + छात्राः । (७) भजेः + अत्र । (८) रोगेभ्यः + मुक्तः । (९) धनैः + अपि (१०) भानुः + अपि ।

(F) Memorise the terminations and the verbal forms of Potential-Mood.

(G) Give the synonyms of the following words :
शिशिर, रज्जु, सर्प, प्रातःकाल, शयन ।

सप्तविंशः पाठः ।

Lesson Twenty Seventh

ऋकारान्त-शब्दाः ।

Nouns ending in ऋ

दातृ (पुं) Donar — पितृ (पुं) Father

विभक्तिः	ए. व.	द्विः व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्रथमा	दाता	दातारौ	दातारः ।	पिता	पितरौ	पितरः ।
द्वितीया	दातारम्	दातारौ	दातॄन् ।	पितरम्	पितरौ	पितॄन् ।
तृतीया	दात्रा	दातृभ्याम्	दातृभिः ।	पित्रा	पितृभ्याम्	पितृभिः ।
चतुर्थी	दात्रे	दातृभ्याम्	दातृभ्यः ।	पित्रे	पितृभ्याम्	पितृभ्यः ।
पञ्चमी	दातुः	दातृभ्याम्	दातृभ्यः ।	पितुः	पितृभ्याम्	पितृभ्यः ।
षष्ठी	दातुः	दात्रोः	दातॄणाम् ।	पितुः	पित्रोः	पितॄणाम् ।
सप्तमी	दातरि	दात्रोः	दातृषु ।	पितरि	पित्रोः	पितृषु ।
संबोधनम्	दातः	दातारौ	दातारः ।	पितः	पितरौ	पितरः ।

Similarly—नेतृ, कर्तृ, वक्तृ etc. Likewise—भ्रातृ, जामातृ etc.

(1) Masculine nouns ending in ऋ when taking the three forms of the Nominative case and two of the Accusative namely singular and dual, the ending ऋ of the noun takes vriddhi. In all these nouns the nominative sing. is formed by dropping र् of आर् and the termination स्. Hence only आ remains at the end.

(2) Nouns showing relationship like भ्रातृ, जामातृ, देवृ, सव्येष्टृ, नृ, दुहितृ, ननान्दृ, यातृ, मातृ are all declined like, पितृ. Here ऋ does not take वृद्धि in the first five forms but it becomes अर्, नृ, सव्येष्टृ are also declined in the same way. Femlnine nouns like ननान्दृ, यातृ have their Acc, plural as ननान्दॄः, दुहितः, मातः, यातॄः etc.

	दातृ (N.) Donor			नृ. (M.) Man		
विभक्ति	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्रथमा	दातृ	दातृणी	दातॄणि ।	ना	नरौ	नरः ।
द्वितीया	दातृ	दातृणी	दातॄणि ।	नरम्	नरौ	नॄन् ।
तृतीया	दातृणा	दातृभ्याम्	दातृभिः ।	त्रा	नृभ्याम्	नृभिः ।
चतुर्थी	दातृणे	दातृभ्याम्	दातृभ्यः ।	त्रे	नृभ्याम्	नृभ्यः ।
पञ्चमी	दातृणः	दातृभ्याम्	दातृभ्यः ।	नुः	नृभ्याम्	नृभ्यः ।
षष्ठी	दातृणः	दातृणोः	दातॄणाम् ।	नुः	त्रोः	नृणाम्–नॄणाम् ।
सप्तमी	दातृणि	दातृणोः	दातृषु ।	नरि	त्रोः	नृषु ।
संबोधनम्	दात्रे–दातृ	दातृणी	दातॄणि ।	नः–(नर्)	नरौ	नरः ।

Likewise—कर्तृ, द्वेष्टृ, वक्तृ, etc.

(3) Similarly are declined other neuter nouns ending in ऋ. They are just declined like वारि ।

(4) Adjectives ending in ऋ such as नेतृ, नप्तृ, श्रोतृ etc. form their feminine by adding ई, as नेत्री, नप्त्री, श्रोत्री, and they are declined like नदी ।

स्वसृ (F.) Sister   नप्त्री (F.) Grand daughter

विभक्ति	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्रथमा	स्वसा	स्वासारौ	स्वसारः ।	नप्त्री	नप्त्र्यौ	नप्त्र्यः ।
द्वितीया	स्वसारम्	स्वसारौ	स्वसॄः ।	नप्त्रीम्	नप्त्र्यौ	नप्त्रीः ।
तृतीया	स्वस्रा	स्वसृभ्याम्	स्वसृभिः ।	नप्त्र्या	नप्त्रीभ्याम्	नप्त्रीभिः।
चतुर्थी	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः ।	नप्त्र्यै	नप्त्रीभ्याम्	नप्त्रीभ्यः।
पञ्चमी	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः।	नप्त्र्याः	नप्त्रीभ्याम्	नप्त्रीभ्यः।
षष्ठी	स्वसुः	स्वस्रोः	स्वसॄणाम् ।	नप्त्र्याः	नप्त्र्योः	नप्त्रीणाम् ।
सप्तमी	स्वसरि	स्वस्रोः	स्वसृषु ।	नप्त्र्याम्	नप्त्र्योः	नप्त्रीषु ।
संबोधनम्	स्वसः	स्वसारौ	स्वसारः ।	नप्त्रि	नप्त्र्यौ	नप्त्र्यः ।

(5) स्वसृ is declined like दातृ, (M.) and before the Acc. Plural termination ऋ is lengthened.

माता पुत्रे स्निह्यति ।

अस्माकम् माता च पिता च रक्षितारौ च ।

भुवनस्य कर्तारमीश्वरम् वन्दे ।

श्रावणः नाम मुनिः मातरम् पितरम् च भक्त्यासेवत ।

यदा सविता अस्तम् गच्छति तदा उलूकाः वृक्षाणाम् कोटरेभ्यः बहिः गच्छन्ति ।

जनाः सवितुः जीवनम् लभन्ते ।

दर्दुराः यत्र वक्तारः तत्र मौनम् हि शोभनम् ।

पूज्यः पितुः परः नास्ति न मातुः दैवतम् परम् ।

अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।
देशस्य कल्याणम् विधातॄणाम् जनानाम् लोकाः स्तोतारः भवन्ति ।
जवाहरलालः बहूनाम् नृणाम् नेता आसीत् ।
रामः भरतस्य लक्ष्मणस्य शत्रुघ्नस्य च ज्येष्ठः भ्राता आसीत् ।
ऋष्यश्रृङ्गः रामस्य स्वसुः भर्ता अभवत् ।
द्रुपदस्य नृपतेः पाण्डवाः जामातरः आसन् ।
भर्तुः स्वसारः ननान्दरः भवन्ति । भ्रात्रोः भार्ये परस्परम् यातरौ स्तः ।
भर्तुः भ्रातरः देवरः भवन्ति । विधातुः चातुर्यम् कवयः वर्णयन्ति ।
धाता प्रथमम् देवान् ततः राक्षसान् ततः नॄन असृजत् ।
नॄणाम् देवानाम् च राक्षसाः द्वेष्टारः अभवन् ।
ऋषयः वेदमन्त्राणाम् द्रष्टारः इति पण्डिताः मन्यन्ते ।
रघोः पिता दिलीपः वसिष्ठस्य धेनुमरक्षत् ।

Vocabulary—शब्दकोशः ।

मातृ-(F.) mother, माता.
पितृ-(M.) Father, पिता ।
रक्षितृ-(M.) Protector, रक्षण करनेवाला ।
शासितृ-(M.) Ruler, शासन करनेवाला ।
कर्तृ-(M.) doer, कर्ता.
श्रावण-(M.) Son of a sage.
भक्ति-(F.) devotion.
सवितृ-(M.) Sun, सूर्य.
उलूक-(M.) an owl, उल्लु.
कोटर-(M.) hole, दर.
दर्दुर-(M.) frog, भेक.
वक्तृ-(M.) Speaker, वक्ता.
पूज्य-(Adj.) Venerable पूजनीय.
परः -(Ind.) Superior.
दैवत-(N.) divinity, दिव्यता.
अप्रिय-(Adj.) unfavourable.
श्रोतृ-(M.) hearer, श्रोता.
धातृ-विधातृ-(M). creater, maker.
स्तोतृ-(M.) one who praises, eulogist, प्रशंसक.
नृ-(M.) man, मनुष्य.
नेतृ-(M.) leader, नेता.
भ्रातृ-(M.) brother, भाई.

भर्तृ–(M.) husband, master.
स्वसृ–(F.) Sister, बहन.
द्रुपद–(M.) King of Panchale country and father in law of the Pandavas.
जामातृ–(M.) Son in law जामाता.
ननान्दृ–(F.) Husband's Sister, ननद.
यातृ–(F.) brother's wife, देवरानी, जेठानी.
परस्परम्–(ind.) with each other, अन्योन्य.
देवृ–(M.) Husband's younger brother, देवर.
चातुर्य–(Adj.) cleverness, dexterity.
द्वेष्टृ–(M.) hater, enemy.
कनिष्ठ–(Adj.) younger, छोटा
वेदमन्त्र–(N.) incantation of the vedas
द्रष्टृ–(M.) seer द्रष्टा
सृज्–(6. P.) to create
त्वष्टृ–(M.) creater of the universe, विश्वकर्मा

अनु+सृ–(1.P.) to follow अनुसरना
सव्येष्टृ–(M.) charioteer सारथि
नुद्–(1.P.) to drive (नोदयति)
प्रतिकूल–(Adj.) unfavourable
भिक्षुक–(M) mendicant
दातृ–(M.) donor
आज्ञा–निदेश (F.M.) order
स्रष्टृ–(M.) creater, स्रष्टा
अनु+स्था–पाल्–to obey, to carry out, पालन करना।
अनु+मन्–(4. A) to confess, कबूल करना।
नप्तृ–(M.) grand son, पौत्र
आ+प्रच्छ (पृच्छ्) (1. P.) to take leave of
दुहितृ–(F.) daughter कन्या
अलम्–(Ind.) enough, काफी
युद्ध–(N.) battle
अनु+इष्–(4.P.) To search, to seek., खोज करना
पिण्ड–(M:) Rice ball offerred in shradha ceremony.

(A) Recognise the forms mentioned below :

अस्माकम्, देवरः, नॄन्, द्वेष्टारः, रक्षितारौ कर्तारम् वक्तारः विधातॄणाम् भ्राता स्वसुः, ननान्दरः।

(B) Give the required forms of words given below :

(1) Acc. Plural : स्वसृ, पितृ, मातृ, सव्येष्टृ.
(2) Genitive Piural : जामातृ, देवृ, द्वेष्टृ, वक्तृ.
(3) Dative Sing. : स्त्रष्टृ, ननान्दृ, नृ, भ्रातृ.
(4) Loc. Sing. : नप्तृ, (M.) नेतृ (F.) दुहितृ यातृ.

(C) Translate the following Sentences into Sanskrit.

(1) The architect of Gods (त्वष्टृ) constructed Amaravati. (2) Rama was the son in law of king Janaka. (3) The Pandavas conquerred the enemies in the battle (4) A woman follows her husband. (5) The creater creates mankind. (प्रजा) (6) Travellers drank the water of the Pond. (7) The charioteer drives the chariot. (8) Oh Lord of Fate, why art thou unfavourable to me? (Use Gen. or Locative.) (9) Mendicants obtain money from charitable donors. (दातृ)(10) The king praises virtues. (11) Sita is the daughter of Janaka, the wife of Rama and the mother of Lava and Kush. (12) They obey the orders of their father and mother. (आज्ञाम् पाल्) (13) The creater created the sun and the moon. (14) The kauravas were the haters of the Pandavas. (15) Ravan was the leader of the demons.

(D) Fill in the blank spaces by proper forms of the words mentioned in the brackets :

(१) बालाः ——— आज्ञाम अनुतिष्ठन्ति । (पितृ)

(२) सीतायाः ——— ——— च सीताम् वने अन्वैष्येताम् (भर्तृ, देवृ)

(३) सीता ——— लक्ष्मणम् अन्वगच्छत् । (देवृ)

(४) विश्वामित्रेण सह रामस्य वनगमनम् ——— अन्वमन्यत । (पितृ)

(५) कृष्णस्य वहवः ——— आसन् । (नप्तृ)

(६) श्वश्वः ——— स्निह्यन्ति । (जामातृ)

(७) सीता ——— ——— आपृच्छत पश्चाद् अगच्छत् पितुः गृहम् । (यातृ, ननान्दृ)

(८) पिता ——— भृशम् धनम अयच्छत् । (दुहितृ)

(९) अप्रियस्यापि पथ्यस्य ——— मित्रे अलम् क्रोधेन । (वक्तृ)

(१०) ——— ——— च वचनमनुतिष्ठ । (पितृ, मातृ)

(११) पाण्डवाः ——— ——— च पिण्डानयच्छत् । (पितृ,मातृ)

(E) Make Sandhi and join the words :

(१) श्रावणः + नाम् । (२) मुनिः + मातरम् । (३) कोटरेभ्यः + बहिः । (४) सवितुः + जीवनम् । (५) दर्दुराः + यत्र । (६) पितुः + परः + नास्ति । (७) स्तोतारः + भवन्ति । (८) पाण्डवाः + जामातरः । (९) स्वसारः + ननान्दरः । (१०) दुहितुः + भर्ता । (११) देवराः + वा । (१२) कवयः + वर्णयन्ति । (१३) ततः + राक्षसाः । (१४) राक्षसाः + द्वेष्टारः ।

(F) Give the synonyms of the following words :
राक्षस, जामातृ पितृ, विधातृ, भ्रातृ, मातृ, स्वसृ, दुहितृ, भिक्षुक, वेद.

अष्टाविंशः पाठः ।

Lesson Twenty Eighth

विशेषण —शब्दाः ।

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेषस्य ।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ।

The adjective takes the same gender, number and case of the noun which it qualifies.

In other words the gender, case and number of the adjectives are changed in accordance with these nouns qualified by them.

Adjective	Meaning	Masc.	Fem.	Neut.
श्वेत	white	श्वेतः	श्वेता	श्वेतम् ।
कृष्ण	black	कृष्णः	कृष्णा	कृष्णम् ।
रक्त	red	रक्तः	रक्ता	रक्तम् ।
पीत	yellow	पीतः	पीता	पीतम् ।
हरित	green	हरितः	हरिता	हरितम् ।
मधुर	sweet	मधुरः	मधुरा	मधुरम् ।
अम्ल	sour	अम्लः	अम्ला	अम्लम् ।
शीतल	cold	शीतलः	शीतला	शीतलम् ।
उष्ण	hot	उष्णः	उष्णा	उष्णम् ।
लघु	small	लघुः	लघ्वी	लघु ।
गुरु	big	गुरुः	गुर्वी	गुरु ।
विशाल	spacious	विशालः	विशाला	विशालम्
शोभन	nice, fine	शोभनः	शोभना	शोभनम् ।
रमणीय	beautiful	रमणीयः	रमणीया	रमणीयम् ।
स्थूल	big, gross	स्थूलः	स्थूला	स्थूलम् ।
कृश	lean, thin	कृशः	कृशा	कृशम् ।
मनोहर	beautiful	मनोहरः	मनोहरा	मनोहरम् ।
साधु	good	साधुः	साध्वी	साधु ।
बुद्धिमत्	Intelligent	बुद्धिमान्	बुद्धिमती	बुद्धिमत् ।
दुष्ट	bad	दुष्टः	दुष्टा	दुष्टम् ।

An adjective always adds to or changes the qualities of a noun. Example नीलम् उत्पलम् । (blue lotus flower) The word blue नीलम् adds to the quality of the noun. So it is an adjective. The word उत्पल is in neuter gender and hence the word नील has taken that gender according to the rule mentioned above.

इदम् (M. F. N.) (Adj) This.

	Sing.	Dual.	Plural
Nom. M.	अयम्	इमौ	इमे ।
Nom. F.	इयम्	इमे	इमाः ।
Nom. N.	इदम्	इमे	इमानि ।

Use of Adjectives.

पुं :–अयम् शोभनः नरः । इमौ शोभनौ नरौ । इमे शोभनाः नराः ।
स्त्री :–इयम् शोभना वनिता । इमे शोभने वनिते । इमाः शोभनाः वनिताः ।
नपुं :–इदम् शोभनम् पुष्पम् । इमे शोभने पुष्पे । इमानि शोभनानि पुष्पाणि ।

The forms of other cases will be similarly made. The masculine form of शोभन will be शोभनः, the feminine by adding आ will be शोभना and the neuter will be शोभनम्. The forms of all the cases will be like these of बाल, बाला and वन in all the genders. The adjectives which are made feminine by adding ई will he declined like नदी. Some times present participles and past participles too are used as adjectives. Example मृतः मृगः a dead deer; सुप्ताः जनाः men asleep, मृत and सुप्त are both past passive participles and they two like other adjectives will take the number, Gender and case of the noun qualified by them.

वनिताः नीलैः कुसुमैः स्वकेशान् भूषयन्ति ।

समुद्रेषु विपुलानि जलानि सन्ति । गहने वने दावानलः दृश्यते ।
मूर्खौ पुरुषौ इतस्ततः भ्रमतः । ग्रामेषु मयूराः रुचिरैः बर्हैः शोभन्ते ।
नगरस्थानाम् जनानाम् शरीराणि कृशानि वर्तन्ते ।
वर्षासु वृक्षाणाम् पर्णानि हरितानि । सर्पस्य गरलम् तीव्रम् ।
कण्ठस्य भूषणम् मधुराणि वचनानि । वनस्य मार्गाः कुटिलाः सन्ति ।

मधुरेण रसेन युक्तम् आम्रफलम् आस्वादते ।

पुरुषाणाम् स्वरः कठोरः किंतु वनितानाम् स्वरः मृदुः ।

ग्रामस्य रक्षकाः बलिष्ठाः सन्ति । अयम् तडागः श्वेतैः कमलैः शोभते ।

शठानाम् चरितम् गर्ह्यम् । निबिडे वने बहवः वृक्षाः सन्ति ।

कृष्णः पीतम् वस्त्रम् धारयति अतः सः पीताम्बरः इति कथ्यते ।

बालस्य अङ्गुल्यः रक्ताः सन्ति । कटुना औषधेन रोगाः नश्यन्ति ।

शिशिरे नद्याः जलम् शीतलम् भवति ।

गजस्य शरीरम् स्थूलम् किंतु सिंहस्य शरीरम् कृशम् ।

कोकिलस्य काकस्य च वर्णः कृष्णः किंतु कोकिलस्य स्वरः मधुरः काकस्य च कठोरः ।

शुकस्य ग्रीवा कृष्णा किंतु कपोतस्य ग्रीवा नीला ।

भारतदेशस्य त्रिवर्णिकः ध्वजः अस्ति ।

Vocabulary—शब्दकोशः ।

विपुल-(Adj.) abundent बहुत.
गहन-निबिड-(Adj.) dense, गाढ़.
दावानल-(M.) conflagration, fire.
मयूर-(M.) Peacock.
बर्ह-(M.) Peacock's feather, मोरछल.
कृश-(Adj.) thin, पतला.
गरल-(N.) Poison, Venom, जहर.
तीव्र-(Adj.) acute.
कुटिल-(Adj.) curved, वक्र-टेढ़ा.
मार्ग-(M.) road, रास्ता.
बलिष्ठ-(Adj.) mighty, बलवान.
अयम्-(इदम्-Pro.) this, यह.
पीताम्बर-one who wears a yellow dress-an epithet of Lord Krishna.
रक्त-(Adj.) red, लाल.
कटु-(Adj.) bitter.
औषध-(M.) medicine, दवाई.
नील-(Adj.) blue, भूरा.
विभु-(Adj.) pervasive, व्यापक.
अभिजात-(Adj.) noble birth, कुलीन ।
कुकारुक-(Adj.) foolish-upstart कारुक-शिल्पी artisan.

दूष् (दुष्ट)-(10 U.) to Spoil, विगाडना.
अपि-(ind.) though, भी.
विनीत-(Adj.) Polite.
उत्सुक-(Adj.) zealous, उत्साही.
उद्धत-(M.) naughty, rude.
अलस-(M.) idle, आलसी.
वयस्क-(M.) young, जवान.
भारतीय-(M.) Indian.
आतिथ्य-(N.) hospitality.
वैदिशिक-विदेशीय-foreigner, विदेशी.
विश्रुत-श्रुत-(Adj.) Famous, प्रख्यात.
गृहलभ्य-(Adj.) Like one's house.
सिकख-(M.) name of the Commnnity of Punjab.
तुङ्ग-प्रांशु-(Adj.) tall.
गुरख-(M.) name of a community of Nepal.
वामन-पृश्नि-अल्पतनु-(M.) dwarf पृश्नि-नाटा.
लोभनीय-(Adj) tempting.
उपायन-(N.) gift, भेट.
प्रत्याख्यान-(N.) rejection refuse, (प्रति+आ+ख्या-2.P.)
वाचाट-(M.) talkative, बातूनी.
अनृतिक-(M.) liar, झूठा.
समाज-लोक-(M.) Society.
प्रतिदिनम्-दिने. दिने-(Ind.) every day, day by day, हररोज.
आदर-(M.) respect.
अप+क्षि-(क्षय्)-(I. P.) to decrease. (क्षीणः भवति)
साटी-(F.) sari.
अश्वारोह-(M.) horseman, rider.
सदृश-(Adj.) similar, तुल्य
दर्प-(M.) Pride, haughtiness. अभिमान.
उद् + मील्-(1. P.) to blossom.
(उन्मीलयति)-to bud. (causal)
दंष्ट्र-(N.) claw, दाढ.
नवीन-(Adj.) new.
जीर्ण-पुरातन-(Adj.) worn out, old.
मुदित-(Adj.) rejoiceful.
स्वदेश-(M.) own country.
विचित्र-(Adj.) inscruteble, malvellous, variegated.
निर्धन-दीन-(M.) Poor.
तक्र-(N.) Butter milk.
चक्रिका-(F.) cycle, साइकल
त्वरित-(Adj.) speedy.
चपल-(Adj.) swift, active.

स्वाध्याय—Exercise.

(A) Find out adjectives and the nouns qualified by them in all the sentences given in this lesson.

(B) Translate into Sanskrit the sentences given below :-

(1) The creation of the creater is beautiful and pervasive. (2) The speech of this girl (अस्याः) is sweet, so she has a noble birth. (3) This artisan is upstart, so he spoils his work. (4) My servant though old (वृद्धः अपि) is polite and enthusiastic, your servant though youthful is arrogant and lazy. (5) People of India are famons for their hospitality, (आतिथ्येन) foreigners feel (अनु + भू) at home here in India. (6) The Sikhs of the Punjab are tall in stature, but the Gurkhas of Nepal are dwarf. (7) This is a tempting (लोभनीय) gift. It is difficult to reject it. (8) Raman is very talkative and a liar, so regard for him decreases in the society day by day. (9) The Sari of Prabha is black, while that of Lata is white. (10) Just as a man abandons old clothes and put on new ones, so (the) embodied soul (जीव) leaves old bodies and enters new ones.

(C) Fill in the blank spaces by the proper forms of the words given in brackets :

(१) ——— अयम् अश्वः ——— अश्वारोहाः तमारोहन्ति। (सुन्दर, बलिष्ठ) (२) ——— सदृशाः ते सर्वे योधाः दर्पेण बलेन च। (सिंह) (३) ———, ——— च वानराः युद्धम् कुर्वन्ति। (नख, दंष्ट्र) (४) कपयः समुद्रे ——— सेतुम् अरचयन्। (दीर्घ) (५) ——— नृपतयः मुनिवरान् प्रणम्य ——— अगच्छन्। (मुदित, स्वदेश) (६) ईश्वरस्य माया ———। (विचित्र) (७) ——— वस्त्राणि यच्छत। (निर्धन) (८) ——— तक्रम् मा पिब, ——— दुग्धम् पिब। (अम्ल, उष्ण) (९) गोविंदस्य चक्रिका ———। (त्वरित) (१०) भानुः

——— ——— उन्मीलयति । (मनोहर, कमल) (११)
——— अश्वः ——— अश्वात् चपलः । (श्वेत, कृष्ण) (१२)
यमुनायाः ——— ——— कृष्णः व्यहरत् । (नील, जल)

Note : सदृश, सम etc. take the instrumental case.

(D) Make Sandhi and join the following words :

(१) दावानलः + दृश्यते । (२) इतस्ततः + भ्रमरः ।
(३) मयूराः + रुचिरैः । (४) वनिताः + नीलैः । (५) स्वरः + मृदुः ।
(६) रक्षकाः + बलिष्ठाः । (७) बहवः + वृक्षाः । (८) अङ्गुल्यः + रक्ताः ।
(९) नद्याः + जलम् । (१०) स्वरः + मधुरः ।

(E) Give the synonyms of the following words :

नील, मयूर, मृदु, कृष्ण, पीत, हरित, अभिजात.

मधुराष्टकम्—(Sweet Poetry)

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ।। १ ।।

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ।। २ ।।

वेणुर्मधुरः रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ३ ।।

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ४ ।।

करणं मधुरं तरणं मधुरं हृदयं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ५ ।।

गुन्जा मधुरा माला मधुरा यमुना मधुरा वीचीर्मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ६ ।।

गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ७ ।।

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ।। ८ ।।

Vocabulary—शब्दकोशः ।

मधुर-delicious, sweet, अधर-lip, वदन-(N.) face, हसित-smile, मधुराधिपतिः-The Lord of sweetness (Krishna). अखिल-all. (2) वसनम्-clothes, वलितम्-twisting of his limbs, चलित-walking, भ्रमितम्-wandering. (3) वेणुः-flute, रेणुः-dust, पाणिः-hand, सख्यम्-friendship. (4) पीतम्-drinking, भुक्तम्-eating रुपम्-handsomeness, तिलकम्-auspicious mark on the forehead. (5) करणम्-doing, तरणम्-swimming, रमणम्-sport, वमितम्-speaking, शमितम्-peace. (6) गुञ्जा-name of beads for the garland वीची-wave, सलिलम्-water. (7) गोपी-cowherd damsel, लीला-delightful sport, युक्तम्-union, मुक्तम्-separation दृष्टम्-vision, शिष्टम्-good behaviour, (8) गोपाः-cowherds, गावः-cows, यष्टि-stick दलितम्-destruction, फलितम्-fruit.

नवविंशः पाठः ।

Lesson Twenty Ninth

उपसर्गाः-Prefixes

(1) A prefix is placed before a verb generally, it adds to the original meaning of the verb, creates a contrary meaning or it is placed before the verb as a decorative to it without making any addition or reduction in the sense of the verb e. g. प्रविशति, विचिन्तयति ।

(2) The verb sometimes changes its pada (Parasmai pada etc.) after taking the prefix (prefixes प्र, प्ररा etc. are shown before in the संज्ञा प्रकरणम्). For example :— संगच्छते, विरमति, निविशते and so on.

'पाण्डवाः मन्युम् संहरन्ति।'

देवाः राक्षसान् युद्धे विजयन्ते। किम् त्वम् सज्जनान् अपभाषसे?
आचार्यः आसनात् उत्तिष्ठति। युवाम् गुरोः उपदेशम् अवमन्येथे।
चमूः नगरात् बहिः निर्गच्छति। अहम् अद्य अध्ययनम् आरभे।
वह्निः कदापि शीतम् नापेक्षते। वयम् अत्र सुखम् अनुभवामः।
छात्राः सूर्यपुरात् पर्यटनाय अद्य प्रतिष्ठन्ते।
हरिणाः वृक्षाणाम् छायासु संविशन्ति। इन्दुः समुद्रात् उद्गच्छति।
मित्र, किम् त्वम् स्वकार्यात् विरमसि? विष्णुः देवैः सह स्वर्गे संतिष्ठते।
सः पुष्पाणि स्वमित्रेभ्यः उपाहरत्। शिशवः पर्वतानारोहन्ति।
गुरुः शिष्याय शास्त्रमुपदिशति। जनाः प्रायः नेतॄननुसरन्ति।

Vocabulary—शब्दकोशः।

मन्यु-(M.) anger, wrath
आसन-(N.) seat,
पर्यटन-(N.) Roaming, excursion
ईक्ष्-(1. A.) to see
अप+ईक्ष्-to expeet, अपेक्षा रखना
उप+ईक्ष्-to overlook, to neglect, उपेक्षा करना
निर्+ईक्ष्-to inspect,
परि+ईक्ष्-to examine, परीक्षा करना to test
प्रति+ईक्ष्-to wait for, प्रतीक्षा करना
सम्+ईक्ष्-to consider, to criticise
नी-(1. P.) to take away,
अप+नी-to remove, दूर करना
आ+नी-to bring, लाना
उप+नी-to bring near, to lead to invest with the sacred thread.
गम्-(1. P.) to go,
अधि+गम्-(गच्छ्), to obtain, to accomplish प्राप्त करना
अनु+गम्-to follow, अनुसरण करना
अव+गम्-to understand जानना
आ+गम्-to come, आना
उद्+गम्-to rise, ऊपर आना
उप+गम्-to approach, पास में जाना।
निर्+गम्-to go out, बाहर जाना।

सम्+गम्-(A.) to meet, मिलना।

जि-जय्-(1. P.) to win

परा+जि-(A.) to be defeated पराजय होना।

वि+जि-to be victorious जय होना।

भाष् (1. A.) To speak

प्रति+भाष्-to reply, प्रत्युत्तर देना।

अप+भाष्-to abuse, to revile, बुरा कहना।

सम्+भाष्-to converse, बातचीत करना।

भू-भव् (1. P.) to be

अनु+भू-To experience, अनुभव करना।

उद्+भू-To be produced, to rise, उत्पन्न होना।

अभि+भू-to attack, to over-power, हमला करना।

सम्+भू-to be possible, संभव होना।

प्र+भू-to be born, to be produced उत्पन्न होना.

परा+भू-to be defeated पराजित होना।

मन् (4.A.)-to believe

अव+मन्-to disregard, अपमानित करना।

रभ् (1. A.)

आ+रभ्-to begin शुरु करना।

रम्-(1. A.) to play

वि+रम्-(1. P.) to desist, to cease रुकना

विश् (6. P) to enter

उप+विश्-to sit, बैठना।

अभि+नि+विश्-(A.) to resort, आश्रय लेना।

सम्+विश्-(P.)to sleep, to rest, सो जाना।

नि+विश्-(A.) (causal) To put, to place

प्र+विश्-to enter

वृत्-वर्त-(1. A.) to be, to exist

प्र+वृत्-to prevail, to be busy, प्रवृत्त होना.

नि+वृत्-to return, लौटना।

स्था+तिष्ठ-(1. P.) to stand

अधि+स्था-to preside, to stand in, to rest on, रहना

अनु+स्था-अदा करना, to perform

अव+स्था-to abide, संकलित होना। to remain

आ+स्था-to resort, आश्रित होना।

उद्+स्था-to stand खड़ा रहना

प्र+स्था-(1. A.) to start, to set out शुरु करना।

सम्+स्था-to conform, साथ में रहना।

उप+स्था-to pray, to worship

स्मृ (1. P.) to remember

वि+स्मृ-(स्मर्)-to forget, भूल जाना।

ह्र (हर्–1. P.) to take away
अप+ह्र-to carry off, to take away.
आ+हृ–to bring, लाना.
उद् + आ + ह्र–to illustrate, (उदाहरति)
उदाहरण देना, to give an examale.
उप+हृ–to give as a gift, उपहार देना.
परि+हृ–to remove, to abandon, त्याग करना.
प्र+हृ–to strike, मारना.
वि+हृ–to sport, विहार करना.
व्या+हृ–to utter, बोलना.
सम्+हृ–to restrain, निग्रह करना.
ह्वे–(I. P.) to call.
आ+ह्वे–(I. P.) to call, बुलाना to summon.

अनु+रुध्–(4. A.) to obey,
आ+दृ–आज्ञाका पालन करना। –(4. A.) मान देना, to respect, (आद्रियते).
प्र+सृ–(I. P.) to spread, फैलना.
सम्+चिन्त्–to think चिंतन करना।
अव+तॄ–(I. P.) to descend, नीचे उतरना।
वि+सृज्–(6. P.) to cast away.
अभि+धा–(अभिहित) told, (Past Participle).
अधि+रुह–(I. P.) to rise above, ऊपर जाना।
परि+भ्रम्–to roam about, चारों ओर घूमना.
प्र+दा-(यच्छ्)–to give.
त्रस्–(4. P.) to trouble, (पीड्).
क: अपि–any one.

स्वाध्याय—Exercise

(1) Find out the prefixes in the sentenecs in this lesson given above and show their meanings.

लेखनम्—Writing

(A) Translate into Sanskrit :—

(1) The preceptor is sitting over his seat. (2) Rama summons the monkeys. (3) Students emerge from the school to go towards their home. (4) Kings defeat their enemies. (5) Oh God of Destiny ! (विधातृ). Why do you trouble me ?

(6) Women sport in the garden. (7) He brings the cow home. (8) They have not forgotten us. (9) No body awaits you. (10) The sage worships the sun-god in the morning (उप+स्था).

(B) Fill in the blank spaces by proper forms of the words given in the bracket.

(१) इयम् नदी समुद्रेण ——— । (सम् + गम्) (२) भारतीयाः आफ्रीकादेशात् स्वदेशम् ——— । (नि + वृत्) (३) इन्दुः तापम् ——— । (परि + हृ) (४) ते उद्यमेन धनम् ——— (अधि + गम्) (५) सीता पुत्रयोः मुखे ——— । (निर् + ईक्ष्) (६) कुमारौ जननीम् ——— (उप + गम्) (७) गुरोः भयम् शिष्यान् ——— (अभि + नि + विश) । (८) यूयम् किम् फलम् ——— (अप + ईक्ष्).

(C) Make Samdhi joining the following words :—

(१) पाण्डवाः + मन्युम् । (२) देवाः + राक्षसान् । (३) आचार्यः + आसनात् । (४) गुरोः + उपदेशम् । (५) बहिः + निर्गच्छति । (६) स्वमित्रेभ्यः + उपाहरत् । (७) भारतीयाः + आफ्रीकादेशात् । (८) ते + अत्र । (९) पुत्रयोः + मुखे (१०) गुरोः + भयम् ।

(D) Give the synonyms of the following words. शिशिर, पुत्र.

परिशिष्ट-व्याकरणम्—Additional Grammar

सर्वनामानि—Pronouns

The Pronominal adjective सर्व (F. सर्वा.) means 'all, every' and is declined thus :—

Masculi. सर्व पुं०			Feminine. सर्व स्त्री०		
ए.व.	द्वि.व.	ब.व.	ए.व.	द्वि.व.	ब.व.
प्र. सर्वः	सर्वौ	सर्वे ।	सर्वा	सर्वे	सर्वाः ।
द्वि. सर्वम्	सर्वौ	सर्वान् ।	सर्वाम्	सर्वे	सर्वाः ।
तृ. सर्वेण	सर्वाभ्याम्	सर्वैः ।	सर्वया	सर्वाभ्याम्	सर्वाभिः ।
च. सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः ।	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः ।
पं. सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः ।	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः ।
षं. सर्वस्य	सर्वयोः	सर्वेषाम् ।	सर्वस्याः	सर्वयोः	सर्वासाम् ।
स. सर्वस्मिन्	सर्वयोः	सर्वेषु ।	सर्वस्याम्	सर्वयोः	सर्वासु ।

सर्व. (नपुं)

प्र. सर्वम्	सर्वे	सर्वाणि ।	The other forms of the remaining case sare declined like the Masculine.
द्वि. सर्वम्	सर्वे	सर्वाणि ।	

(1) The persons तद् (He, She) यद् (Which, Who) एतद् (this) and किम् (which, what) are declined in the Masculine gender respectively. The nom. sing. forms of तद्, यद्, एतद् and किम् are सः, यः, एषः and कः respectively.

(2) In the Feminine gender these prououns are declined as if they were ता, या, एता and का i. e. ending in आ. The Nom. Sing. form of them are सा, या, एषा end का respectively.

Masculine			Feminine		
ए. व.	द्वि. व,	ब. व.	ए. व.	द्वि. व.	ब व.
प्र. सः	तौ	ते।	सा	ते	ताः।
प्र. यः	यौ	ये।	या	ये	याः।
प्र. एषः	एतौ	एते।	एषा	एते	एताः।
प्र. कः	कौ	के।	का	के	काः।

Other forms are declined like सर्व. masculine. Just as द्वि. तम् तौ तान्।

Other forms are declined like सर्व. Feminine. Just as. द्वि. ताम् ते ताः।

Neuter

प्र. द्वि. तत्-द् ते तानि।
प्र. द्वि. यत्-द् ये यानि।
प्र. द्वि. एतत्-एतद् एते एतानि।
प्र. द्वि. किम् के कानि।

Other forms of Neuter are declined like Masculine.

(3) एन is used optionally for एत in the accusative, the instrumental singular and the genitive and Locative dual in three genders.

Masculine

Acc. एतम् or एनम्, एतौ or एनौ, एतान् or एनान्।
Inst. sing. एतेन-एतेन Gen. & Loc. Dual एतयोः-एनयोः।

Feminine

Acc. एताम् or एनाम्, एते or एने, एताः or एनाः।
Inst. Sing. एतया or एनया। Gen & Loc. Dual एतयोः एनयोः।
Neut. Accu. एतद् or एनद्, एते or एने, एतानि or एनानि।

Participles

Participles are of two kinds, Declinable, Indeclinable, Declinable participles are used as adjectives and Indeclinable Participles are not declined like nouns.

(1) The Past Participle whether active or passive is an adjective. The gerund and the Infinative are indeclinable and active, they are never passive. The past participle by itself denotes completion of an action and past time generally. The gerund denotes a prior action or an action completed before another, while the infinitive in sanskrit is as a general rule an infinitive of purpose.

(1) (A) The past Passive participle is formed by adding to some roots त or न, before which the vowels of roots do not take their Guna or Vriddhi substitutes.

ज्ञा–ज्ञात　　भू–भूत　　मृ–मृत
जि–जित　　नश्–नष्ट　　हन्–हत
नी–नीत　　प्रच्छ्–पृष्ट　　रम्–रत
गम्–गत　　मन्–मत　　पा–पीत
नम्–नत　　शम्–शान्त　　तुष्–तुष्ट ।

(B) By adding इत to others before which all the roots of the Tenth conjugation are changed in the same manner as before the sign अय–E. g.

पत्–पतित　　चुर्–चोरित　　खाद्–खादित ।
विद्–विदित　　तड्–ताडित　　श्वस्–श्वसित ।
कुप्–कुपित　　भूष्–भूषित　　स्था–स्थित ।
कूज्–कूजित　　कृत्–कीर्तित　　सिच्–सिक्त ।

Indeclinable Participles

(2) **Gerund:**—The gerund (absolutive) is formed by applying the suffix त्वा to some roots and इत्वा to others when the root has no prefix attached to it. The final vowel or the penultimate short vowel sometimes takes guna. भूत्वा–having done etc.

ज्ञा–ज्ञात्वा	भू–भूत्वा	लिख्–लिखित्वा ।
नी–नीत्वा	डी–डयित्वा	चुर्–चोरयित्वा ।
श्रु–श्रुत्वा	विद्–विदित्वा	तड्–ताडयित्वा ।
कृ–कृत्वा	तुष्–तुष्टवा	कृत्–कीर्तयित्वा ।

When a prefix is attached to a root, the Gerund is formed by applying the suffix य in the same manner as the य of the passive. But if the root ends in a short vowel, त्य is applied before which the vowel of the root remains unchanged.

वि+ज्ञा–विज्ञाय	प्र+तड्–प्रताड्य ।
वि+नी–विनीय	सं+कृत्–संकीर्त्य ।
अनु+गम–अनुगम्य	वि+जि–विजित्य ।
सं+भू–संभूय	सं+हृ–संहृत्य ।
प्र+चुर–प्रचोर्य	उप+श्रु–उपश्रुत्य ।

(3) **Infinitive :**—The infinitive of purpose is formed by adding to some roots तुम् and to others इतुम, before which the final vowel or penultimate short take their Guna substitutes. e. g. जेतुम् to win, to eat etc.

ज्ञा—ज्ञातुम्	त्यज्—त्यक्तुम्	भू—भवितुम् ।
जि—जेतुम्	दह्—दग्धुम्	विद्—वेदितुम् ।
नी—नेतुम्	गम्—गन्तुम्	वृत्—वर्तितुम् ।
श्रु—श्रोतुम्	दंश्—दष्टुम्	जीव्—जीवितुम् ।
कृ—कर्तुम्	रम्—रन्तुम्	कथ्—कथयितुम् ।

(4) **The Present Participle :** This participle is used as an adjective in sanskrit. When two actions take place or are going on at the same time, the present Participle is used to denote one of them, the other being denoted by the verb.

The present Participle is formed by adding त् to the special bases of roots in Parsmaipada and मान or आन in Atmanepada or the Passive.

Presmaipada	**Atmanepada**
भू–भवत्	लभ्–लभमान ।
गम्–गच्छत् ।	वृत–वर्तमान ।
नश्–नश्यत्	मृ–म्रियमाण ।
विश्–विशत्	विद्–विद्यमान ।
स्मृ–स्मरत्	रम–रममाण ।
पिब्–पिबत्	तड्–ताडयमान ।

(5) **Potential** Passive Participle :

This participle is formed by adding तव्य, अनीय and य to the roots of the words. This participle denotes that it is right, fit or advisable to do that which is signified by the root. Thus कर्तव्य, करणीय, and कार्य all derived from कृ mean ' that which should, must or ought to be done or deserves to be done.

The feminine bases of these adjectival participles are formed by the addition of आ e, g. कर्तव्या, करणीया, and कार्या ।

R. T. दा – दानीय – दातव्य – देय चुर् – चोरणीय – चोरयितव्य चोर्य
गै – गानीय – गातव्य – गेय तड् – ताडनीय – ताडयितव्य ताड्य
जि – जयनीय – जेतव्य – जेय स्पृह् – स्पृहणीय – स्पृहयितव्य स्पृह्य
पच् – पचनीय – पक्तव्य – पाच्य – धृ – धारणीय–धारयितव्य धार्य
दश् – दर्शनीय – द्रष्टव्य – दृश्य पाल् – पालनीय – पालयितव्य पाल्य
भू – भवनीय – भवितव्य – भाव्य नी – नेतव्य – नयनीय – नय ।

(6) The Passive Voice

(1) The passive base of all roots, whatever conjugation they may belong to, is formed by adding य to them in the same manner that य is added to roots of the 4th conjugation. The Atmanepada terminations of the Present, the Imperfeet, the Imperative and the potential are then applied to the base, and thus passive forms of the verbs are obtained. Thus, from पच्, the passive base is पच्य, present 3rd Per. sing. पच्यते ।

(2) Before the य of the passive Roots ending in ऋ, change the ऋ to रि, if it is preceded by a consnant and to अर् if preceded by a conjunct censonant.

E. G. Rt. कृ to do passive क्रियते ।
„ हृ to carry „ ह्रियते ।
„ स्मृ to remember „ स्मर्यते ।
„ स्तृ to spread „ स्तर्यते ।

(3) Final short इ or उ of a root is lengthened. e. g. चि to collect Pass चीयते । श्रु-श्रूयते, जि–जियते, स्तु–(to praise)स्तूयते ।

(4) The roots दा, धा, मा, स्था, गै, पा, सो and हा become respectivly–दी, धी, मी, स्थी, गी, पी, सी, ही. Final ए, ऐ and ओ are changed to आ. दा–दीयते, धा–धीयते (to hold), स्था–स्थीयते, ध्यै–ध्यायते, म्लै–म्लायते ।

Note : The original roots, and not the substitutes which some roots take before the conjugational sign like गम् (गच्छ्) गच्छ्, दा (यच्छ) are used for forming the passive forms.

(4) When the verb is transitive (सकर्मक) and governs an object in the Accusative case the Nominative of the active construction is changed to Instrumental and the Accusative to the Nominative. Thus.

Active	Passive
जनः देवम् नमति ।	जनेन देवः नम्यते ।
नृपः अरीन् जयति ।	नृपेण अरयः जीयन्ते ।
व्याधयः त्वाम् पीडयन्ति ।	व्याधिभिः त्वम् पीडयसे ।
सूर्यः प्रकाशते ।	सूर्येण प्रकाश्यते ।
वयम् नगरीम् पश्यामः ।	अस्माभिः नगरी दृश्यते ।

In transitive construction the verb takes the number and person according to the object of the active construction.

(5) When the verb is instransitive, (अकर्मक) the Passive construction becomes Impersonal, and the verb is always in the Third Person Singular and the Nominative of the Active construction being changed to the Instrumental.

Active	Passive
अहम् तिष्ठामि	मया स्थीयते ।
त्वम् नगरीम् गच्छसि	त्वया नगरी गम्यते ।

Note : The details of this chapter will be given in the Third Part.

[४] गद्य–विभागः ।

(Prose Section)

(१) कुक्कुटः

कुक्कुटो मनोहरः खगोऽस्ति । तस्य विचित्रो वर्णः । तस्य मस्तके रक्ता चूडा शोभते । अतः सः ताम्रचूडो इति कथ्यते । कुक्कुटः सर्वत्र दृश्यते । प्रायः क्षेत्रपालाः तान् पालयन्ति । सः धान्यबीजानि क्षुद्रान् कीटान् च खादति । प्रत्यूषे सः तारस्वरेण कूजति । तस्य तारस्वरः छात्रान् अन्यान् सुप्तान् जनान् च प्रबोधयति । तस्य तारस्वरम् श्रुत्वा उषसि जनाः शय्याम् मुञ्चन्ति । ततो जनाः शौचम्, स्नानम्, ध्यानम् च विधाय स्वासु क्रियासु प्रवर्तन्ते । कुक्कुटः सदैव जनान् प्रातःकाले बोधयति । सः प्रहरे प्रहरे तारस्वरेण कूजति । 'गतः समयः पुनः न निवर्तते' इति सः घोषयति । अयम् प्रकृत्या नियुक्तः प्राहरिकः एव । सः अन्यखगेभ्यः वीरः प्रगल्भः निर्भीकः च भवति । सः शत्रुभिः सह सुतराम् युध्यते । सः स्वस्य भार्याम् कुक्कुटीम् अन्येभ्यः शत्रुभ्यः संरक्षति ।

कुक्कुट्याः मस्तके चूडा न वर्तते । सा मासि मासि अण्डानि यच्छति बालयति च प्रीत्या स्वशावकान् ।

कुक्कुटः कूजनं कृत्वा सम्बोधयति बालकान् ।
शय्याम् मुञ्चत भो बालाः पाठान् पठत पुत्रकाः ॥

यः प्रबुध्यति प्रत्यूषे सः नैवोद्विजते श्रमात् ।
आयुर्बलं च बुद्धिं च धनं धान्यं लभेन्नरः ॥

Vocabulary—शब्दकोशः ।

मनोहर-(Adj.) beautiful, सुंदर
चूडा-(F.) crest, मुकुट
ताम्रचूड-a bird having a red crest.
क्षेत्रपाल-(M.) farmer, किसान
क्षुद्र-(Adj.) trifle, छोटा
कीट-(M.) insect, जन्तु
प्रत्यूष-उषस् (F.) early morning, dawn बडी सुबह
सुप्त-(P. P.) sleeping, सोया हुआ ।
शय्या-(F.) bed, बिछौना
शौच-(N.) lavatory शौचक्रिया purification of the body,
क्रिया-(F.) action, duty, कर्तव्य
विधाय-(G) having performed,
स्नान-(N.) bath, स्नान
बोधयति-to awaken, जगाना.
तारस्वर-(M.) high pitched voice.
प्र + वृत् (वर्त)-to prevail, to engage, प्रवृत्त होना ।
गतः समयः-past time,
नि + वृत्-to come back,
प्रहर-(M.) period of three hours, तीन घंटोका समय
नियुक्त-(Adj. P. P.) appointed
प्रकृति-(F.) nature, कुदरत ।
प्राहरिक-(M.) An announcer of the end of प्रहर
ध्यान-(N.) meditation,
वीर-(M.) brave,
प्रगल्भ-(Adj.) bold, audacious
नीर्भीक-(Adj.) fearless,
अयम् (इदम्-पुं)-this.
अन्य-(Pro. M.) other, दूसरा
सुतराम् (Ind.) easily, in a better way, सरलता से ।
कुक्कुटी-female cock, मुर्गी
मस्तक-शीर्ष-head,
मासि मासि-every month,
शावक-(M.) young one of a bird or a beast, बच्चा ।
प्रीति-(F.) affection, प्रेम.
सम् + बुध्-(सम्बोध्) to address
पुत्रक-(M.) little child.
यद् (यः) who, जो,
उद् + विज् (6. A.) to be disgusted, उद्विग्न होना
श्रम-effort, labour work
आयुस्-(N.) life, जीवन
बल-(N.) strength.
धान्य-(N.) corn, अनाज.

स्वाध्याय—Exercise

Answer the following questions into Sanskrit

(A) प्रश्ना :—(१) कुक्कुटः कीदृशः खगः अस्ति ? (२) तस्य मस्तके किं शोभते ? (३) के तान् पालयन्ति ? (४) प्रत्यूषे सः कान् प्रबोधयति ? (५) तस्य तारस्वरम् श्रुत्वा जनाः किम् कुर्वन्ति ? (६) सः प्रहरे प्रहरे किम् घोषयति ? (७) कुक्कुटी मासि मासि किम् यच्छति ? (८) किम् सः बालकेभ्यः उपदिशति ?

(B) Disjoining the sandhis of the words given below.
(१) कुक्कुटो मनोहरः । (२) खगोऽस्ति । (३) विचित्रो वर्णः । (४) ताम्रचूड इति । (५) सदैव (६) नैवोद्विजते । (७) आयुर्बलम् । (८) लभेन्नरः ।

(C) Give the syncnyms of the following words :—
मस्तक, कीट, बुद्धि, बल, धन.

---

(२) कोकिलः ।

कोकिलो वने उपवने च प्रायो दृश्यते । स आम्रवृक्षे प्रायो निवसति । कोकिलाय आम्रस्य मञ्जर्योऽतीव रोचन्ते । यदा वसन्तर्तोरागमनम् भवति तदा कोकिलः पञ्चमेन स्वरेण कूजति । तस्य मधुरः स्वरो सर्वेभ्यो जनेभ्यो रोचते । तस्य कूजनेन सर्वे जना आह्लादमनुभवन्ति । कोकिलस्य वर्णः कृष्णः काकस्यापि च वर्णः कृष्णः । किन्तु काकस्य स्वरः परुषः । अतः काकः स्वरेण कोकिलात् भिद्यते ।

अतः कथ्यते –

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।।

यदा वसन्तागमो भवति तदा कोकिलो मधुरस्वरेण कूजति । वसन्तसमये आम्रवृक्षे मञ्जर्यः प्रस्फुटन्ति । कोकिलो आम्रमञ्जरीभक्षयति । अतः तस्य स्वरो मधुरो भवति ।

कोकिलाः स्वाण्डानि काकस्य नीडे धरन्ति । वायसी तान् पुष्यति । अतः कोकिलः परभृतः इति कथ्यते । यदा तस्य पक्षाः सम्पद्यन्ते तदा सः कोकिलायाः नीडे गच्छति । सः तत्र निवसति कूजति च । तस्य कूजनेन वातावरणम् संगीतमयम् आह्लादजनकम् च भवति । अतः सर्वेऽपि जनाः कोकिलमभिनन्दन्ति ।

कोकिलानां स्वरो रूपं नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ।।

Vocabulary-शब्दकोशः ।

कोकिल-(M.) Cuckoo,
आम्रवृक्ष-mango tree, आमका पेड़ ।
मञ्जरी-(F.) sprout, मंजरी
आगमनम्-coming, आना
पञ्चम-(M.) Fifth note of music.
आह्लाद-(M.) delight, pleasure आनन्द
वसन्त ऋतु-spring season.
परुष-(Adj.) harsh, कठोर
भिद्यते-to differentiate. भेद होना ।
भेद-(M.) difference, (भिन्न)
प्राप्त-(Adj. p.p.)-arrived, come,
प्र+स्फुट्-(1. P.) to blossom, विकसित होना, to sprout.
धृ-धर्-(1. P.) to lay,
वायसी-(F.) Female Crow.
परभृत-Bird brought up by other birds, cuckoo.

पक्ष-(M.) wing, पंख
सम्+पद्-(4. A.) to get, to obtain, प्राप्त होना ।
वातावरण-(N.) atmosphere,
संगीतमय-full of music,
अत: (Ind.) so that
अभि + नन्द् (1. P.) to greet, to welcome, अभिनंदन करना ।

स्वाध्याय:-Exercise

(A) Answer the questions given below in Sanskrit.

(१) कोकिल: कुत्र निवसति ? (२) कोकिलाय किम् रोचते ? (३) कोकिल: कदा कूजति ? (४) सर्वे जना: कथम् आह्लादमनुभवन्ति ? (५) कथम् काक। कोकिलात् भिद्यते ? (६) कोकिलस्य स्वर: कीदृश: भवति ? (७) कस्मात् कारणात् कोकिल: परभृत: इति कथ्यते ?

(B) Separate the Sandhis of the words given below.

(१) कोकिलो वने (२) प्रायो निवसति (३) [illegible] (४) सर्वेभ्यो जनेभ्य: (५) आम्रमञ्जरीर्भक्षयति । (६) पक्षा यदा ।

(C) Give the Synonyms of the following words :—
कोकिल, आम्रवृक्ष, मञ्जरी, परुष, नीड, पक्ष.

---

(३) वाटिका ।

नगरस्य प्रान्ते एका वाटिका अस्ति । वाटिकायाम् वृक्षाः । गुल्माः लताः दूर्वाङ्कुराः च सन्ति । गुल्मेषु पुष्पाणि रोहन्ति । कुसुमानाम् रक्त-श्वेत-नील-पीत-हरित-कौसुम्भादयः विविधाः वर्णाः । तत्र इन्दीवरम् कुमुदम् पुण्डरीकम्-कुन्दम्-केतकी-मालती-चम्पकः-इत्यादि विविधानि कुसुमानि विकसन्ति । प्रभाते तेषाम् कलिकाः विकसन्ति । सायंकाले च ताः कलिकाः निमीलन्ति । वाटिकायाम् मध्ये जलाशयोऽस्ति । तस्मिन् जलाशये मत्स्याः कच्छपा मकरा इत्यादयो जलचराः निवसन्ति । तत्र सारसा बका हंसादयः खगाः स्नानम् कुर्वन्ति जलम् च पिबन्ति । जलाशयं परितः काष्ठासनानि वर्तन्ते । काष्ठासनेषु जना उपविशन्ति । बाला बालिकाः च दुर्वाङ्कुरेषु इतस्ततो धावन्ति कन्दुकैः च खेलन्ति । तत्र बहूनि धारायन्त्राणि अपि सन्ति । बहवः खगा वृक्षेषु कलरवं कुर्वन्ति । वनिता नराश्च इतस्ततो भ्रमन्ति तथा आनन्दम् प्रमोदम् च अनुभवन्ति ।

इयम् वाटिका खलु सर्वेभ्यो रोचते ।
अतीव रमणोया इयं वाटिका दृश्यते ।

Vocabulary—शब्दकोशः ।

वाटिका-(F.) garden, orchard
प्रान्त-corner, कोना
गुल्म-(M.)झाडी,कुञ्ज,लतागृह arbour
दूर्वाङ्कुर-(M.) lawn, दूब, sprouts of Durva grass.
कौसुम्भ-(M.) name of the colour
इन्दीवर-(N.) blue lotus, नीला कमल
कुमुद-(N) white lotus, श्वेत कमल
पुण्डरीक-(N.) red lotus, लाल कमल
कुन्द-(N.) Jessamine flower, मोगरा। केतकी, मालती, चम्पक are the names of the flowers.
कलिका-bud, कली, मुकुल
नि+मील्-(1 P) to close
जलाशय-(M) Pond, tank.
सारस-(M.) Indian crane
बक-(M.) crane, बगुला
परित-(Ind.) round about. चारों ओर
काष्ठासन-(N.) A wooden bench
धारायन्त्र-(N.) fountain, फौवारा
प्रमोद-(M.) delight, enjoyment
इयम्-(इदम्-F.) this, यह
दृश्यते-(दृश्-Passive) seen
अतीव-(Ind.) very much बहुत

स्वाध्याय—Exercise.

Questions

(A) Answer the following questions in Sanskrit :

(१) वाटिकायाम् किं किं भवति ? (२) कदा कलिकाः विकसन्ति निमीलन्ति च ? (३) सरस्याम् कानि विकसन्ति ? (४) तत्र खगाः किं कुर्वन्ति ? (५) दूर्वाङ्कुरेषु बालाः बालिकाः च किं कुर्वन्ति ? (६) खगाः वृक्षेषु किं कुर्वन्ति ? (७) के वाटिकायाम् इतस्ततो भ्रमन्ति ?

(B) Separate the following words by disjoining the sandhi.

(१) कलयो विकसन्ति, (२) सरस्यस्ति। (३) कच्छपा मकराः (४) जलचरा निवसन्ति। (५) सारसा बका हंसादयः। (६) जना उपविशन्ति। (७) बाला बालिकाः। (८) इतस्ततो धावन्ति। (९) बहवो जलशीकराः। (१०) खगा वृक्षेषु।

(C) Give the syn nyms of the following words :

वाटिका, वृक्ष, लता, कलिका, सायंकाल, जलाशय.

---

(४) वनराजः।

सिंहो वनचरेषु श्रेष्ठः पशुः। सः वनस्य वनचराणां च नृपः कथ्यते। सः सर्वेषु पशुषु बलवत्तमोऽस्ति। सर्वे वनचराः तस्याधीनाः सन्ति।

एकदा सर्वेषाम् पशूनाम् मध्ये सिंहासने सिंह उपाविशत्। तत्र अन्ये वनचरा मृदङ्गभेर्यादिवाद्यान्यवादयन्त। सिंहासनस्य शोभा अतीव रमणीयाभवत्। सिंहासनस्योर्ध्वभागे छत्रमासीत्। वानरः चन्दनं घृष्ट्वानयत्। शृगालः तस्य मस्तके चन्दनलेपनमकरोत् मुकुटमस्थापयत् च। गजः वनराजं पुष्पैरार्चयत्। भल्लूर्वेणुमवादयन्त्। अश्वो गीतमगायत्। अन्ये वनचरा अन्यवाद्यान्यवादयन्त। केचित् पशवः शंखानघोषयन्त। ततो वनराजो विशालसेनया सह स्वराष्ट्र पदयात्रामारभत वनशोभां चापश्यत्।

वनेऽपि सिंहाः मृगमांसभक्षिणो, बुभुक्षिता नैव तृणं चरन्ति।
एवं कुलीना व्यसनाभिभूता, न नीच-कर्माणि समाचरन्ति॥

Vocabulary—शब्दकोशः।

वनराज-(M.) king of the forest, lion, सिंह.
वनचर-(M.) forester, beast of forest.
बलावत्तम्-(M.) the most powerful, सबसे बलवान।
सिंहासन-(M.) lion seat,
अधीन-(Adj) dependent obedient
एकदा-(Ind.) one day, once.
मृदङ्ग-(M.) Drum, ढोल.
भेरी-(F.) Tubor, नगाड़ा
वाद्-(10 u.) to play or sound musical instrument, बजाना.
भक्षिन्-eater, भक्षण करनेवाला
बुभुक्षिन्-(Adj.) hungry.
व्यसन-(N.) difficulty कठिनाई
अभिभूत-(P. Pass. P.) over powered,
नीचकर्माणि-bad deeds,
सम् + आ + चर्-to perform, to practise.
शोभा-(F.) beauty, elegance.
ऊर्ध्व-(Ind.) upper part,
छत्र-(N.) umbrella,
चन्दन-(N.) Sandalwood,
घृष्टवा-(घृष्-1. P. Gerund) pounding.
शृगाल-(M) fox, सियार
लेपन-(N) besmearing,
मुकुट-(M.) crown मुकुट
अस्थापयत्-(स्था-causal) to place, स्थापित करना.
अर्च्-(10. u.) to worship, पूजा करना।
भल्लू-भल्लूक - भल्लुक-(M.) a bear, भालू
वेणु-(M.) flute
केचित्-some.
घुष्-(10. u.) to blow, to sound loudly,
विशालसेना-big army,
पदयात्रा-(F.) journey on foot.

स्वाध्याय—Exercise

Questions

(A) Write the answers of the following questions in sanskrit :

(१) सिंह: केषां नृप: कथ्यते ? (२) एकदा कुत्र स: उपाविशत् ? (३) वानर: किम् आनयत् ? (४) शृगाल: किम् अकरोत् ? (५) गज: कथम् आर्चयत् ? (६) भल्लू: अश्व: च किमवादयताम् ? (७) पश्चात् सिंह: विशालसेनया सह किमकरोत् ?

(B) Separate the following words by disjoining the sandhi :

(१) सिंहो वनचरेषु । (२) सिंह उपाविशत् । (३) वनचरा मृदङ्गभेर्यादि । (४) सिंहासनस्योपरि । (५) पुष्पैराचयत् (६) भल्लूर्वेणुम् । (७) अश्वो गीतम् । (८) वनचरा अन्यवाद्यानि । (९) वनराजो विशालसेनया । (१०) वाद्यान्यवादयन्त ।

(C) Give the synonyms of the following words :

पशु, वेणु, सिंहासन, छत्र, वानर, गज, भल्लू, शंख, सेना, शोभा.

---

(५) पूर्णचन्द्रमिच्छति श्रीरामः ।

रामो बाल्यावस्थायां कौसल्यायाः समीपे प्रतिदिनमक्रीडत् । एकदा स: पूर्णिमायामाकाशे पूर्णं चन्द्रमपश्यत् । सः स्वहस्तौ चन्द्रं प्रत्युदहरत् । एवं सः चन्द्रम् (ग्रहीतुम्) ऐच्छत् । अतः सः कौशल्याम् चन्द्रमयाचत । माता कौशल्या रामाय विविधानि क्रीडनकानि रत्नानि चायच्छत् । किंतु रामः क्रीडनकानि रत्नानि चाक्षिपत् भृशमाक्रोशत् च । रामस्य सेविकाः तत्रागच्छन् । ताः सेविका विविधैः प्रकारैः रामम् सान्त्वयितुम् अयतन्त । तथापि रामो नेत्राभ्यां विपुलानि अश्रूण्यमुञ्चत् । ततो राजमाता कौशल्या भयार्ताभवत् । ततः सा दशरथमाह्वयत् । तदनन्तरं दशरथः तत्रागच्छत् । राजा दशरथोऽपि विविधप्रकारैः रामम् सान्त्वयितुम् अयतत । तथापि रामः रोदनात् न व्यरमत् ।

पश्चात् सः सचिवं सुमन्त्रमाह्वयत् । तदनन्तरं चतुरः सुमन्त्रः एकां सेविकाम् 'दर्पणमानय' इत्यकथयत् । सा सेविका दर्पणमानयत् सुमन्त्राय चायच्छत् । सुमन्त्रो रामस्य हस्तयोः दर्पणमयच्छत् । रामो दर्पणे चन्द्रमश्यत् । ततः सः रामः शान्तोऽभवत् अहसत् च । रामो 'दर्पणे चन्द्रोऽस्ति' इति अमन्यत । अतः सः सुखमन्वभवत् ।

दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चोराणामनृतं बलम् ॥ १ ॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामः त्रिलोकानां रामः श्रीमान् स नः प्रभुः ॥ २ ॥

आपदापहर्तारम् दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३ ॥

शब्दकोशः ।

बाल्यावस्था–(F.) childhood.
कौसल्या–the name of Ram's mother.
पूर्णिमा–the full moon day.
स्वहस्त–one's own hand.
उद्+हृ–to raise, to lift, ऊँचा करना.
दुर्बल–(M.) weak.
बल–(N.) strength, power.
रोदन–(N.) crying.
ग्रह् (गृह्)–to seize, पकड़ना ।
विविध–(Adj.) different kinds.
क्रीडनक–(N.) toy, खिलौना ।
याच् (I. A.) to beg, माँगना ।
भृशम्–(Ind.) very much. अत्यंत ।

सेविका-(F.) maid-servant.
सान्त्व्-(10. u.) to becalm. to tranquil, (तुम्-inf.)
अनृत-(N.) falsehood, असत्य
मौनित्वम्-Silence, Taciturnity.
प्रकार-(Adj.) method, kind.
यत्-(I. A.) to try, प्रयत्न करना।
तथापि-(Ind.) yet.
अश्रु-(N.) tear, आँसू
राजमाता-(F.) Royal mother.
अनृत-(N.) falsehood, झूठ। lie.
आ+नी-(आनय-Imper.) bring.
आराम-(M.) garden, बाग.
कल्पवृक्ष-celestial tree, desire yielding tree.
विराम-(M.) Stopping.
अभिराम-(Adj.) lovable, charming, (प्रिय, सुंदर).
भयार्त-afraid of, trembled out of fear. भयभीत होना.
आ+ह्वे-(I. P.) to call, बुलाना।
अनन्तरम्-(Ind.) afterwards.
वि+रम्-(I. P.) to desist, रुकना.
रोदन-(N.) crying, रोना.
सचिव-(M.) Minister.
सुमन्त्र-(M.) the name of the Minister of King Dasharatha.
दर्पण-(N.) Mirror, सीसा.
आपदामपहर्तारम्-remover of difficulties-hardships. दुःख।
संपद्-wealth,
भूयः-(Ind.) often, बार बार.
त्रिलोक-the three worlds.

स्वाध्यायः—Exercise

Question

(A) Answer the following questions in Sanskrit.

(१) एकदा रामः आकाशे किमपश्यत्? (२) रामः किं ऐच्छत्? (३) कौशल्या रामाय किमयच्छत्? (४) पश्चात् रामः किमकरोत्? (५) सुमन्त्रः सेविकां किमवदत्? (६) सुमन्त्रः दर्पणे रामं किमदर्शयत्? (७) कथं रामः सुखमन्वभवत्?

(B) Separate the Sandhis of the following words.

(१) रामो बाल्यावस्थायाम्। (२) सेविका विविधप्रकारैः। (३) अश्रूण्यमुञ्चत्। (४) ततो राजमाता। (५) भयार्तोऽभवत्। (६) इत्यकथयत्। (७) शान्तोऽभवत्। (८) चन्द्रोऽस्ति। (९) सुखमन्वभवत्। (१०) प्रत्युदहरत्।

(C) Give the synonyms of the following words.

अश्रु, सचिव, दर्पण.

(६) कुक्कुरवृकयोः ।

वृकः– सुप्रभातम् मम मित्र, कथम् त्वं पीनोऽसि ।

कुक्कुरः– त्वं कृशो दृश्यसे ।

वृकः– अथ किम् । अहं निशायां दिने च भोजनं मृगयामि, तथाप्यहमर्धक्षुधितः ।

कुक्कुरः– यदि त्वं मामनुकरोषि तर्हि त्वं सुष्ठु भोजनं लभसे ।

वृकः– जीवनस्य निर्वाहार्थम् त्वं किं करोषि ?

कुक्कुरः– अहं मम पालकस्य गृहं रक्षामि । अहं तस्य सर्वकार्यम् विश्वसनीयः सेवकः इव करोमि । सः मह्यम् सुष्ठु भोजनं यच्छति ।

वृकः– अहं चौर्यकार्येण अर्धक्षुधितेन च श्रान्तो भवामि । किं तव पालकः मम सेवामिच्छति ? किं सः मां पालयिष्यति ?

कुक्कुरः– आगच्छ मया सह अहं मम पालकाय कथयामि ।

वृकः– किं तव स्कन्धे केशाः न वर्तन्ते ?

कुक्कुरः– चर्मपट्टिकाया घर्षणेन स्कन्धस्य केशा अनश्यन् ।

वृकः– चर्मपट्टिका ! कीदृशी चर्मपट्टिका ?

कुक्कुरः– यदा मम पालकः माम् शृङ्खलया नियन्त्रयति तदा मम स्कन्धे चर्मपट्टिकामारोपयति ।

वृकः– अहो शृङ्खला चर्मपट्टिका च । उपकृतोऽस्मि मम मित्र । यद्यप्यहमर्धक्षुधितः तथाप्यहं स्वातन्त्र्यम् न त्यजामि ।

प्राणं वापि परित्यज्य मानमेवाभिरक्षतु ।
अनित्यो भवति प्राणो मानस्त्वाचन्द्रतारकम् ॥ १ ॥
उधमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षड़ेते यत्र वर्तन्ते तत्र दैवं सहायकृत् ॥ २ ॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥ ३ ॥

Vocabulary – शब्दकोशः ।

वृक–(M.) wolf, भेड.
कुक्कुर–(M.) dog, सारमेय, कुत्ता.
सुप्रभातम्–Good morning, शुभ सुबह.
पीन (M.) fat, स्थूल.
कृश (Adj.) thin, क्षीण.
दृश्यसे–(दृश्–Passive) seen.
अथ किम्–yes, sense of affirmative.
मृग्–to search.
अर्धक्षुधित–(Adj.) Half starved.
अनु+कृ–to imitate, अनुकरण करना.
सुष्ठु–(Adj.) good अच्छा.
निर्वाहार्थम्–for maintenance.
पालक–master, स्वामी.
विश्वनीय–(Adj.) trustworthy.
चोर्यकार्य–Stealing.
श्रान्त–(Adj.) tired, थक जाना ।
परवशम्–dependent on others.
आत्मवशम्–dependent on own self.
सेवा–(F.) service.
इष्–(इच्छ्) to wish.
पाल्–(10. u.) to maintain, to foster. पालन करना
स्कन्ध–(M.) shoulder कन्धा
चर्मपट्टिका–(F) collar (of leather) चमड़ेका पटा. ।
घर्षण–(न) rubbing. घिसना
शृङ्खला–chain, जंजीर.
नि+यन्त्र् (10. 4.) to bind, to restrain, बाँधना.
आरोपयति–(आ+रुह्–causal) to impose, to put on.
उपकृत–(P.P.P.) gratefully.

उद्यम–(M.) diligence.
स्वातन्त्र्य–(N.) freedom.
प्राण–(M.) breath, life.
मान–(N.) respect.
अनित्य–(Adj.) transitory, fleeting.
आचन्द्रतारकम्–as long as the moon and the stars shine.
धैर्य–(N.) firmness.
पराक्रम–(M.) feat.
षडेते–these six.
दैवम्–fate.
सहायकृत्–helper.
साहस–(N.) adventure.
समास–in short, briefly.
विद्यात्–which is to be known.

स्वाध्यायः—Exercise

Questions

(A) Answer the following questions in Sanskrits:—

(१) कस्मात् वृकः कृशः ? (२) कुक्कुरः जीवनस्य निर्वाहार्थम् किं करोति ? (३) वृकः कथं श्रान्तो भवति ? (४) कुक्कुरस्य स्कन्धे स्थिताः केशाः कथमनश्यन् ? (५) कुक्कुरस्य स्वामी कदा तस्य स्कन्धे चर्मपट्टिकामारोपयति ? (६) वृकः किं न त्यजति ?

(B) Disjoin the Sandis :—

(१) कृशो दृश्यसे। (२) तथाप्यहम्। (३) श्रान्तो भवामि। (४) केशा न। (५) उपकृतोऽस्मि। (६) यद्यप्यहमर्धक्षुधितः।

(C) Give the synonyms of the following words :

गृह, चर्म, कुक्कुर।

---

(७) असत्यभाषणफलम् ।

कस्मिंश्चिद् ग्रामे यदुनाथो नाम कश्चित् मेषपालोऽवसत् । सः अजा बर्करांश्चापालयत् । तस्य पुत्रो गोपालः प्रतिदिनं मेषान् बर्करांश्च चारयितुं बनोपकण्ठे क्षेत्रमनयत् । सः असत्येन भाषणेन जनानवञ्चयत्। एकदा सो मेषपालो 'वृकः समायातः, वृकः समायातः' इति मिथ्या वारंवारमुच्चैराक्रोशत् । तस्याक्रोशं श्रुत्वा बहवः क्षेत्रपाला गोपाश्च मेषाणाम् रक्षणाय तत्रागच्छन् । तदा सो बालिशः क्षेत्रपालेभ्यः परिहासेनाकथयत् 'नास्ति वृकः, नास्ति वृकः' इति । एवं सोऽनेकदा तानवञ्चयत् ।

एकदा परमार्थतः तत्र कश्चिद् वृकः समायातः । तदा सः उच्चैः 'वृकः समायातः, वृकः समायातः' इति वारंवारमाक्रोशत् । 'गोपालोऽसत्यवादी बालोऽस्ति' इति सर्वे क्षेत्रपाला अमन्यन्त । अतः क्षेत्रपालाः तस्य तथा मेषाणां च रक्षणाय तत्र नागच्छन् । वृकः तस्य मेषान् व्यापादयत् अभक्षयत् च । एवमसत्यशीलस्य सत्येऽपि वचने लोकानां विश्वासो न संजायते । अतः सर्वदा सत्यं वदेत् ।

बालेन भाषितं भूरि, सत्यमप्यनृतं भवेत् ।
पश्यतो मेषपालस्य मेषाः वृकेन भक्षिताः ।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयाद् एषः धर्मः सनातनः ।

Vocabulary—शब्दकोशः ।

असत्यभाषणफलम्–the fruit of false speaking.
मेषपाल–(M.) shepherd.
अज–मेष–(M.) sheep lamb, भेड़
बर्कर–(M.) goat, बकरा,
चारयितुम्–for grazing चराने के लिये.
उपकंठ–(M.) vicinity, proximity, नजदीक.
वञ्च्–(10 u.) to cheat.
समायात–(सम्+या) (P.P.P.) arrived.
मिथ्या–(Ind.) Vanity, falsely.
वारंवारम्–भूरि–(Ind.) often.
आक्रोश–(M.) loud cry, ऊँचेपे रोना.
क्षेत्रपाल–(M.) farmer, किसान.
सनातन–(M.) eternal.
धर्म–(M.) religion, duty.
गोप–(M.) cowherd.
बालिश–(M.) foolish, childish.
परिहास–(M.) joke.
अनेकदा–(Ind.) many times, बहुत बार.
परमार्थत–(Ind.)In fact, really.
असत्यवादिन्–(M.) false, speaking, (असत्यशील)
वि+आ+पद्–(10–u.) to kill.
विश्वास–(M.) confidence.
सर्वदा–(Ind.) always, सदा.
प्रोक्त–(उक्तम्) said, told.
ब्रूयात् (ब्रू–2.P.) should speak.
अप्रियम्–unfavourable.
भाषितं–भाषा–(P.P.P.) told
भक्षित–(भक्ष)–(P.P.) eaten.
पश्यत्–(Pr. P.) seeing.

स्वाध्याय—Exercise

Questions

(A) Write in Sanskrit the answers of the following questions.

(१) गोपालः किमर्थम् मेषान् क्षेत्रमनयत् ? (२) सः कथं जनान् अवञ्चयत् ? (३) एकदा सः किमाक्रोशत् ? (४) सर्वे क्षेत्रपालाः किममन्यन्त ? (५) वृकः किमकरोत् ? (६) कुत्र विश्वासः न जायते ?

(B) Disjoin the Sandhis.

(१) मेषपालोऽवसत् । (२) उच्चैराक्रोशत् । (३) सो बालिशः । (४) क्षेत्रपाला बालस्य । क्षेत्रपाला अमन्यन्त । (५) विश्वासो न । (६) अजा बर्कराः ।

(C) Give the synonyms of the following words :
अज, क्षेत्र, मिथ्या, बहु, सत्यम्, असत्यम् ।

(८) संयानस्थानकम् ।

यत्र संयानानि विरमन्ति तत् संयानस्थानकमिति कथ्यते । अग्निरथस्य चालको लोहपथेन संयानं ग्रामाद् ग्रामान्तरं संचालयति । तस्यान्तभागे संयानपोऽस्ति । अग्निरथचालकः संयानस्य संचालनाय तस्याज्ञां प्रतीक्षते । तत्र अनेकाः विरामवेदिकाः सन्ति । तत्र विविधाः कार्यालयाः सन्ति । स्थानकाधिपस्य, मुद्रिकायाः, पोट्टलिकायाः तारस्यापि च कार्यालयाः सन्ति । तत्र नराणां नारीणां च पृथक् प्रतीक्षालयोऽस्ति । कषायपानगोष्ठाः, फलविक्रयगोष्ठाः, मिष्टान्नविक्रयगोष्ठाः, पुस्तकविक्रय-गोष्ठाः च विरामवेदिकासु यत्र तत्र वर्तन्ते ।

ग्रामान्तरं प्रस्थिताः यात्रिकाः विरामवेदिकायां संयानागमनं प्रतीक्षन्ते । यदा संयानं स्थानके ग्रामान्तराद् आगच्छति विरमति च तदा विराम-वेदिकायां कोलाहलः उद्भवति । विक्रेतारः स्वपण्यानि विक्रीणते । भारिकाः यात्रिकाणाम् संभारमुद्वहन्ति । यदा विरामान्ते संयानपः हरित-ध्वजम् विधूनयति शीशरवं च करोति तदा अग्निरथोऽपि संचालनाय

शीशनादं करोति । तदनन्तरम् संयानम् स्थानकात् बहिर्निर्गच्छति । संयानस्य निर्गममानन्तरं स्थानके शान्तिः प्रसरति ।

आगच्छन्ति च गच्छन्ति, रेलयानानि यत्स्थलात् ।
तिष्ठन्ति यत्र धूमसंयुक्ताः अग्निरथाः रेलस्थानकमुच्यते ।

Vocabularyशब्दकोशः ।

संयान-(N.) train (रेलयान)
संयानस्थानक-(N.) Railway station, स्टेशन । (रेलस्थानक)
अग्निरथ-(M.) engine इंजन
चालक(M.) Driver गाडी जलानेवाला ।
लोहपथ-(M.) rail पटरी
सम् + चल्-(चाल्-causal) to drive, चलाना ।
ग्रामान्तरम्-other village or town
संयानप-(M.) guard संरक्षक
विरामवेदिका-(F.) platform प्लेटफोर्म
कार्यालय-(M.) office, दफतर
स्थानकाधिप-(M.) Station Master, स्टेशन मास्टर.
मुद्रिका-Ticket, टिकट
पोट्टलिका-goods, सामान
तार-(M.) telegraph.
प्रतीक्षालय-(M). waiting room विश्राम खण्ड
कषायपानगोष्ठ-(M.) Tea-stall चायकी दुकान
फलविक्रयगोष्ठ-(M.) Fruit stall
मिष्टानविक्रयगोष्ठ-Sweet meat stall, मिठाईकी दुकान
पुस्तकविक्रयगोष्ठ-Book-stall
प्रस्थित-going to जानेवाला
कोलाहल-(M.)hustle and bustle,
विकेतृ-(M.) seller, बेचनेवाला
धूमसंयुक्त-along with smoke
पण्य-(N.) commodity, बेचनेकी चीज़ ।
भारिक-(M.) labourer, मजदूर
संभार-(M.) luggage सामान
उद्+वह्-(1. P.) to carry
वि+धू-(10 u.) to shake, flutter
शीशरव-(N.) whistle, सीटोकी आवाज
शीशनाद-Engine's whistle
निर्गमन-going out side

स्वाध्यायः—Exercise

(A) Answer the following questions :—

(१) किं संयानस्थानकं कथ्यते ? (२) चालकः कस्याज्ञां प्रतीक्षते ? (३) वेदिकास्थितानां कार्यालयानां नामानि कथय ? (४)

वेदिकास्थितानां गोष्ठानां नामानि कथय? (५) यात्रिकाः किं प्रतीक्षन्ते? (६) वेदिकायां कोलाहलः कदा उद्भवति? (७) विरामान्ते संयानपः किं करोति? (८) अग्निरथोऽपि किं करोति? (९) स्थानके शान्तिः कदा प्रसरति?

(B) Disjoin the sandhis.

(१) चालको लोहपथेन। (२) तस्याज्ञाम्। (३) प्रतीक्षाळयोऽस्ति। (४) कोलाहल उद्भवति। (५) बहिर्निर्गच्छति।

(C) Give the synonyms of the following words :—

लोह, शान्ति, कोलाहल, यान।

---

(९) सारमेयस्य मौर्ख्यम्।

जनाः प्रायः सारमेयम् पालयन्ति। सारमेयः अन्नं मांसं च भक्षयति। सः पालकस्य गृहम् रक्षति। सः रथ्यायाम् इतस्ततः भ्रमति। पालकः तस्य कण्ठे चर्मपट्टिकामारोपयति। यदा रथ्यायाम् चौरं वा अपरिचितम् जनम् वा पश्यति तदा सः उच्चैः भषति। तस्य भषणेन चौराः दूरं पलायन्ते

पालकः च प्रबोधति । पालकः कुक्कुरः च परस्परं स्निह्यति । तथा तस्य बालकाः तेन सह क्रीडन्ति ।

अथैकदा कश्चित् कुक्कुरः मांसखण्डमलभत । सः तं मुखेन गृहीत्वा पश्चात् सः नद्याः समीपमगच्छत् । नद्या उपरि दारुफलकस्य सेतुरस्ति । तत्र सोऽगच्छत् सेतौ चातिष्टत् । नद्याः जले सः स्वप्रतिबिम्बमपश्यत् । तदा सः अचिन्तयत् 'अन्यः कुक्कुरः नद्याम् वर्तते तथा च तस्य मुखे मांसखण्डमपि वर्तते ।' अतः तम् मांसखण्डम् केनाप्युपायेनापहरामि इति चिन्तयति । अनन्तरं मम मांसखण्डम् यथेच्छम् भक्षयामि इति चिन्तयित्वा ततः सः तम् ग्रहीतुम् स्वमुखमुद्धाटयत् । तस्मिन् क्षणे तस्य मुखात् जले तन्मांसखण्डमपतत् । तेन सः कुक्कुरः खिन्नोऽभवत् अन्यत्र चागच्छत् । अहो कुक्कुरस्य मूर्खता । तृष्णायाः विजयम् सर्वत्र वर्तते ।

अतिलोभः विनाशाय भवति । अतो यावदध्रुवं वस्तु हस्तगतं न भवति तावद् ध्रुवमर्थं न परित्यजेत् ।

यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ।।

अतिलोभो न कर्तव्यो लोभं च परित्यजेत् ।
अतिलोभाभिभूतस्य करस्थमपि नश्यति ।।

Vocabulary—शब्दकोशः ।

सारमेय–(M.) dog, कुत्ता
मांस–(N.) meat, flesh
पालक–(M.) Protector, Master
पालित–(p.p.) tamed, पालतू
अपरिचित–(M.) stranger
दूरम्–(Ind.) far away
परस्परम्–(Ind.) each other
मांसखण्ड–(M.) Piece of meat,
भषण–(M.) barking of the dog

कश्चित्–Some one
ग्रह–(गृहीत्वा) taking लेकर
समीप–(Adj. N.) near
सेतु–(M.) bridge, पुल
स्वप्रतिबिम्ब–(N.) one's own reflection
चिन्त्–(10.U.) to think
उपाय–(M.) means
दारुफलक–wooden platform
अप+हृ–(1. P.) to snatch

यथेच्छम्–(Ind.) at one's own desire.
उदघाटयत्–opened
खिन्न–(P. P.) dejected
अन्यत्र–(Ind.) elsewhere, दूसरी जगह
तृष्णा–(F.) desire, इच्छा
विजय–(N.) victory
लोभ–(M.) Greed
ध्रुवम्-(ind.) certain निश्चित
अध्रुवम्-uncertain अनिश्चित
परि+सेव्–indulge, try, seize.
नष्ट–(नश्–PP.) lost, destroyed
लोभ-(M.) greed
अभिभूत–(P. P.) overpowered, वशमें होना ।
करस्थ–which is in a hand

स्वाध्यायः—Exercise

Question

(A) Answer the following questions in Sanskrit :—
(१) सारमेयः किम् भक्षयति ? (२) कदा सः भषति ? (३) एकदा कश्चित् कुक्कुरः किमलभत ? (४) नद्याः जले सः किमपश्यत् ? (५) तदा सः किमचिन्तयत् ? (६) ततः तम् मांसखण्डम् ग्रहीतुम् सः किम् अकरोत् ? (७) तस्मिन् क्षणे तस्य मांसखण्डस्य किमभवत् ?

(B) Separate the following words and disjoin the sandhis:—
(१) अथैकदा (२) कश्चित् (३) केनाप्युपायेन (४) चागच्छत् (५) खिन्नोऽभवत् ।

(C) Give the synonyms of the following words.
पालक, सारमेय, विजय, मूर्ख ।

---

[५] पद्य–विभागः । (Poetry Section)

बालसुभाषितानि–Poetry Verses for Beginners

(१) अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥

(२) मृतो दरिद्रः पुरुषो मृतो यागस्त्वदक्षिणः ।
मृतमश्रोत्रिये दानं मृतं सैन्यमनायकम् ॥

(३) अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥

(४) शर्वरीदीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्यदीपको धर्मः सुपुत्रः कुलदीपकः ॥

(५) दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

(६) दुर्जनः प्रियवादी स्यान्नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥

(७) अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥

(८) स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥

(९) पक्षिणां बलमाकाशं मत्स्यानामुदकं बलम् ।
दुर्बलानां बल राजा बालानां रोदनं बलम् ॥

(१०) परोऽपि हितवान्बन्धुः बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिः हितमारण्यमौषधम् ॥

(११) उत्तमं स्वार्जित्तं वित्तं मध्यमं पितुरर्जितम् ।
अधमं भ्रातृवित्तं च स्त्रीवित्तमधमाधमम् ॥

(१२) तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना नीयते नासौ मामयं प्रार्थयेदिति ॥

(१३) घृतेन वर्धते बुद्धिः क्षीरेणायुः प्रवर्धते ।
शाकेन वर्धते व्याधिर्मांसं मांसेन वर्धते ॥

(१४) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

(१५) अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥

(१६) शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥

(१७) षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

(१८) गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत् ।
वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः ॥

(१९) विनाश्रया न शोभते पण्डिता वनिता लताः ।
अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते ॥

(२०) पिपीलिकार्जितं धान्यं मक्षिकासंचितं मधु ।
लुब्धेन संचितं द्रव्यं समूलं वै विनश्यति ॥

(२१) यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥

(२२) यो न संचरते देशान् यो न सेवेत पण्डितान् ।
तस्य संकुचिता बुद्धिर्घृतबिन्दुरिवाम्भसि ॥

(२३) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यते सर्वास्तत्राफलाः क्रियाः ॥

(२४) येषां न विद्या न तपो न दानं,
ज्ञानं न शीलं न गुणो धर्मः ।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥

(२५) काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं बंधनाद् मुक्तो सज्जनाः सन्तु निर्भयाः ॥

Vocabulary—शब्दकोशः ।

(1) प्राज्ञः-a wise man, अजरामरवत्-like constantly young and immortal, साधयेत्-perform religious deed as if he were seized by hair and death itself. (2) दरिद्रः—A man in poverty. अदक्षिणः—a sacrifiee without any gift to Brahmins is defunct, अश्रोत्रिये—who does not know vedas, नायक—commander. (3) अनित्यानि—mortal, विभवः—splendour of wealtb is also ephemeral. नित्यं संनिहितो—always in the vicinity. धर्मसंचयः—religious merit should be hoarded. (4)

शर्वरीदीपक—the lamp of night. प्रभाते—morning, त्रैलोक्य—universe, सुपुत्र—worthy son, the lamp of whole race. (5) परिहर्तव्यो—A wicked person should be abandoned, अलंकृतः—adorned, सर्पः—Is not a serpant decorated with jewel (in his head) dangerous? (6) प्रियवादो—Sweet speaking is not worth of confidence, मधु—Honey, हलाहलम्—deadly poison. (7) शास्त्रम्—Scripture destroys many kinds of doubts. दर्शकम्—reveals the ultimate truth. लोचनम्—eyesight, यस्य—He who has not this is indeed blind. (8) स जातो—He is truly born with whose birth his race is elevated, परिवर्तिनि संसारे—In this changing worldly existence who is not born destined to die? (मृतः). (9) बलम्—the strength of birds, दुर्बलानाम्—weak persons. बालानाम्—infants' lies in crying. (10) परोऽपि—A stranger who acts beneficially to us is our brother (बन्धुः), अहितः—acting contrary, देहजो व्याधिः—A malody arising in our body is an evil. आरण्यमौषधम्—forest herbs. (11) स्वार्जितम्—earned by one self is the best, मध्यमम्—next, medium, अधमम् obtained from brother is base, अधमाधमम् from the wife or a woman is the lowest. (12) तृणाल्लघुतरस्तूलः cotton is lighter than straw, याचकः beggar is more worthless than that, वायुना he is not driven away by the blast of wind, which प्रार्थयेदिति 'He may beg from me'. such is the fear from him (13) घृतेन Man's intellect increases by use of clarified butter, क्षीरेण milk, शाकेन by the use of (more) vegetables, मांस flesh, meat. (14) धीमताम्. Intellectual persons pass their time in studying poetry, sciences and entertainment मूर्खाणाम् but fools waste their time in addiction, sleep and quarrels. (15) चत्वारि Four things grow, longevity, learning, fame and strength of those who are always (अभिवादनशीलस्य) respectful and constantly serve venerable persons. (16) शैले On every mountain we cannot

find rubies, मौक्तिकम् pearl, साधवो saints every where चन्दनम् sandle tree. (17) भूतिमिच्छता A man desirous of his own prosperity should हातव्या avoid himself of six vices निद्रा sleepness, lethargy, fear, wrathfulness, laziness, delay. (18) गते mourn the past, चिन्तयेत् not worry about the future. विचक्षणाः wise men are always busy and active with the events of the present. (19) पण्डिताः learned scholars, women and creepers विनाश्रया–withont support, अनर्घ्यमपि–even a priceless ruby requires resort (आश्रयम्) to gold. (20) Food grains collected by ants (पिपीलिका) मक्षिका–bee लुब्धेन–greedy persons, समूलम्–from their very root. (21) यो ध्रुवाणि–One who runs after uncertain ends abandoning those that are certain to be achieved, नश्यन्ति–looses, नष्टमेव–alreedy lost. (22) संचरते देशान्–move about foreign lands, सेवेत–resort to learned men, संकुचिता बुद्धिः–has a nanow intellect, just like a drop of Ghee in water (अम्भसि) (23) यत्र नार्यस्तु–wherever are women adored, रमन्ते–sport with delight, अफलाः–all actions turn futile there. (24) येषां न विद्या–Those who do not possess learning or practise penance or give gifts or have knowledge character, virtue or piety, भुवि भारभूता–a mere burden to the earth roam in the mortal world as beasts in human form. (25) वर्षतु पर्जन्य–Let rain fall in proper time, सस्यशालिनो bear food grains, बंधनात् मुक्तो–be freed from bondage निर्भयाः–devoid of peril.

[४] गीता–विभागः ।
(Geeta Section)

विशिष्ट–श्लोकाः । (Special Verses)

अथ पञ्चमोऽध्यायः — Fifth Chapter

(२२) ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥ ५ ॥

He should be recognised as a constantly renounced person (संन्यासी), who neither hates (any one) nor desires (any thing). Devoid of both (attachment and dislike). Oh, long armed one (महाबाहो), he can be easily released from all bonds.

(२३) नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८ ॥ ५ ॥

(२४) प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥ ५ ॥

A yogi reaching the ultimate truth (तत्त्ववित्) would never believe that does something, while seeing, hearing, touching, smelling, eating, going, sleeping, breathing, conversing, renouncing, accepting, opening and winking with the eyes and thinking that the senses are constantly active with their objects.

(२५) कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११ ॥ ५ ॥

Yogis perform actions simply by body, mind, intelleet and the senses without any attachment for the sake of of self purification.

(२६) विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥ ५ ॥

Learned men look alike towards a Brahmin full of knowledge and politeness, a cow or an elephant a dog or even a pariah (श्वपाके).

(२७) इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ १९ ॥ ५ ॥

Those whose mind rests in equality (साम्ये) have won the whole creation (सर्गो) or the wordly existence (सर्गो); since Brahman (the Absolute). is devoid of blemish and balanced, hence they rest in Him. (ब्रह्मणि)

अथ षष्ठोऽध्यायः — Sixth Chapter

(२८) उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥ ६ ॥

One should elevate one self by one's own self (efforts) and should not degrade one self. One's own self is one's own friend and one's own self is one's own foe. (रिपुः)

(२९) शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥ ६ ॥

One should adjust one's fixed seat in a holy place, it should neither be very high (उच्छ्रितम्) nor very low and should be covered by cloth, the hide of deer and Darbha grass. (Kush below, deerskin in the middle and cloth uppermost).

(३०) तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥ ६ ॥

There having concentrated the mind and restraining the functions of the mind (यतचित्त) and senses he, being seated

on such a seat should practise yoga for the sake of self-purification.

(३१) समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

He should keep his body, head and neck straight and unmoving, steadily (स्थिरः) he should glance at his own tip of the nose and should not look around in all directions.

(३२) प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥ ६ ॥

Feeling oneself calm and devoid of fear, steady in observing the vow (व्रत) of celibacy, restraining the mind, he (yogi) should concentrate (युक्तः) his mind in me and should remain devoted to me.

(३३) युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥ ६ ॥

With proper food and worldly enjoyments, and proper movements in all actions, with balanced sleep (स्वप्न) and wakefulness (अवबोधस्य), the practise of yoga of such a person destroys all evils. (दुःखहा).

(३४) आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥ ६ ॥

He who looks everything as equal on the analogy (उपम्येन) of his own spirit, Oh Arjuna, and regards happiness and trouble all alike, such a yogi is regarded as supreme. (परमं मतः)

अर्जुन उवाच — Arjun says

(३५) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ ६ ॥

For, Krishna, the mind is nimble (चञ्चलम्) and is strongly as well as firmly agitative (प्रमाथि), therefore, I consider (मन्ये) it as difficult (सुदुष्करम्) to restrain as the wind.

(३६) असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।। ३५ ।। ६ ।।

Doubtlessly, Oh Arjuna (long armed one), mind is uncontrollable and nimble. But by practice (अभ्यासेन) of yoga as well as renunciation (वैराग्येण) it can be restrained by us.

(३७) पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ।। ४० ।। ६ ।।

Oh Arjuna, (Son of Prutha), He never meets destruction either in this world or in the other (अमुत्र). He who is the benefactor (कल्याणकृत्) of all never falls into an evil piight.

अथ सप्तमोऽध्यायः । — Seventh Chapter

(३८) मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ।। ३ ।। ७ ।।

Among thousads of men some rare strives to accomplish (Yoga) and of those striving Yoga is who achieved their end, hardly one knows me in reality.

(३९) भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।। ४ ।।

Earth, water, fire, air, sky, mind, intellect and egoism, these are the eight fold divisions of my creation (nature-प्रकृति).

(४०) मत्तः परतरं नान्यत्किञ्चिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।। ७ ।।

Nothing lies beyond me, Oh Arjuna, all this is woven into me like clusters of yarn-beads. (formed by knots on a thread.)

(४१) दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।। १४ ।। ७ ।।

For this wonderful illusion of mine consistlng three gunas (सत्त्व, रज, तम) is divine and difficult to cross over (दुरत्यया), those howevere, who take refuge in me alone surmount this delusion.

(४२) चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।। १६ ।। ७ ।।

Men of good deeds who propitiate (भजन्ते) me, oh Arujuna, are of four varieties; the afflicted, the curious who desire to know me, those who seek wealth and those who have full knowledge about me.

(४३) तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।। १७ ।। ७ ।।

Of these, the man of wisdom (ज्ञानी) constantly attached to me, devoted exclusively to me is of special consideration (best—विशिष्यते). I am extremely (अत्यर्थम्) dear to the wise man (ज्ञानिनो—who knows me in reality) and he too is dear to me.

(४४) उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ।। १८ ।। ७ ।।

All these of course are generous (उदाराः) minded but one with my knowledge is my own self, such is my belief.

He attains the best positinn within me, being (आस्थितः) a man of balanced mind.

(४५) बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सदुर्लभः ॥ १९ ॥ ७ ॥

At the end of a cycle of many births, the man of my knowledge attains (प्रपद्यते) me, realizing that all is krishna Vasudeva (God). such a great soul (महात्मा) is very rare.

अथाष्टमोऽध्यायः ।

(४६) अन्तकाले च मामेब स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

At the end of his life, thinking of one, when he leaves his mortal body (कलेवरम्) and died, he attains my abstract self. Then is no doubt about this.

(४७) ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

Uttering (व्याहरन्) "Om" which is Brahman of one syllable and remembering me, he who dies leaving the mortal body, attains the highest of state.

(४८) आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

All Arjuna, all the worlds from Brahmloka (the abode of Brahma) downwards one returns to the mortal world. But once having attained Me (मामुपेत्य), there remains no rebirth after that.

अथ नवमोऽध्यायः । — Ninth Chapter

(४९) ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥ २१ ॥ ८ ॥

They enjoy the spacious heaven and when their stock of merits (पुण्ये) is exhausted (क्षीणे) they reenter the mortal world, thus having followed (अनुप्रपन्ना) the path of action enjoined by the three vedas (त्रयीधर्मम्) (with the desire to obtain fruit of action), they come and go out of the human world seeking worldly enjoyments (कामकामा).

(५०) अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥ ९ ॥

Those that worship me constantly thinking of me and nothing else (अनन्य) are sustained by me (वहाम्यहम्) in acquiring the desired object (योग) and in preserving what has been acquired (क्षेमम्), since they are perpetually attached (नित्ययुक्त) to me.

(५१) पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

I partake of eveything that is brought to me with devotion by one who has strained himself (प्रयतात्मनः) for me even if it be a mere leaf, a flower, a fruit or water offered to me devotedly.

(५२) अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥ ९ ॥

Even if the vilest sinner (दुराचारो) worships me with exclusive devotion, he should be considered a saint (साधु) since he has rightly resolved.

(५३) क्षिप्रं भवति धर्मात्मा शश्वच्छान्ति निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥ ९ ॥

He soon becomes a man of religions faith and attains permanent peace (शश्वच्छान्तिं), know for it certain, Oh Arjuna, Never is my devotee destroyed or ruined.

शांतिपाठः — Recital for Peace

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Brahman is full (with adjuncts), Brahman is also (without adjuncts)—infinite.

(The full or the whole infinite proceeds from the whole or the infinite). Even the infinite is taken away from the whole, the remnant is whole (infinite) again. (Brahman with adjuncts is taken away from the Brahman devoid of adjuncts and then what remains is whole or full Brahman without adjuncts).

Om Peace, Peace, Peace.

Vocabulary of Synonyms

(पर्याय-शब्दकोशः)

Grammar Lessons — 21 to 29.

I—21. (७९) 'कविः-धीमान्, सूरिः, प्राज्ञः, कृती, कृष्टिः, लब्धवर्णः, विचक्षणः, दीर्घदर्शी । (८०) मुनिः-तपस्वी, तापसः, पारिकाङ्क्षी, वाचंयमः, मुनिः । (८१) आश्रमः उटजः, पर्णशाला । (८२) अब्धिः-समुद्रः, अब्धिः, अकूपारः, पारावारः, सरित्पतिः, उदवान्, उदधिः, सिन्धुः, सरस्वान्, सागरः, अर्णवः, रत्नाकरः, जलनिधिः, यादः पतिः, अपांपतिः । (८३) रत्नम्-मणिः । (८४) कपिः-प्लवङ्गः, शाखामृगः, वलीमुखः, मर्कटः, वानरः, कीशः, वनौकाः । (८५) गिरिः-अद्रिः, गोत्रः, गिरिः, ग्रावा (ग्रावन्), अचलः, शैलः, शिलोच्चयः । (८६) धूर्जटिः-शंभुः ईशः पशुपतिः शिवः, शूली, महेश्वरः ईश्वरः, शर्वः ईशानः शंकरः चन्द्रशेखरः भूतेशः खण्डपरशुः गिरीशः गिरिशः मृत्युंजयः

पिनाकी श्रीकण्ठः महादेवः त्रिलोचनः धूर्जटिः नीललोहितः हरः त्र्यम्बकः त्रिपुरान्तकः, वृषभध्वजः, स्थाणुः रुद्रः उमापतिः । (८७) भूमिः–भूः भूमिः अचला विश्वंभरा धरा धरित्री धरणिः क्षोणिः ज्या काश्यपी क्षितिः वसुमती वसुधा उर्वी वसुंधरा गोत्रा कुः पृथिवी पृथ्वी क्षमा अवनिः मेदिनी मही । (८८) अग्निः–वैश्वानरः, वह्निः धनंजयः ज्वलनः जातवेदाः (दस्) कृष्णवर्त्मा(र्मन्) कृशानुः पावकः अनलः वायुसखः, हुतभुक्(ज्), दहनः, हव्यवाहनः, सप्तार्चिः ।

II—22. (८९) इन्दुः–हिमांशुः चन्द्रमाः चन्द्रः इन्दुः कुमुदबान्धवः विधुः सुधांशुः शुभ्रांशुः ओषधीशः निशापतिः अब्जः जैवातृकः सोमः ग्लौः मृगाङ्कः कलानिधिः निजराजः शशधरः नक्षत्रेशः क्षपाकरः । (९०) नक्षत्रम्–ऋक्षम् भम् तारा तारका उडु-(स्त्री. नपुं.) (९१) वायुः–श्वसनः स्पर्शनः वायुः मातरिश्वा (श्वन्) गन्धवहः गन्धवाहः अनिलः आशुगः समीरः मारुतः मरुत् जगत्प्राणः समीरणः नभस्वान् वातः पवनः पवमानः प्रभञ्जनः । (९२) तरुः–वृक्षः महीरुहः शाखी विटपी पादपः तरुः अनोकहः कुटः द्रुः द्रुमः अगमः । (९३) शत्रुः–रिपुः वैरी सपत्नः अरिः द्विषन् द्वेषणः दुर्हृद् द्विट् विपक्षः अहितः अमित्रः दस्युः शात्रवः शत्रुः अभिघाती (तिन्) परः अरातिः प्रत्यर्थी परिपन्थी । (९४) मित्रम्–सखा (खिन्) सुहृद् । (९५) धेनुः–नवसूतिका । सुव्रता, पीनोघ्नी, पीवरस्तनी, द्रोणदुग्धा । (९६) वृषभः–उक्षा, भद्रः, बली बलीवर्दः ऋषभः वृषभः वृषः अनड्वान् सौरभेयः गौः । (९७) ओतुः–बिडालः मार्जारः वृषदंशकः आखुभुक् । (९८) आखुः–उन्दुरुः मूषकः आखुः । (९९) गुरुः–बृहस्पतिः सुराचार्यः गीर्पतिः धिषणः गुरुः जीवः आङ्गिरसः वाचस्पतिः । (१००) निधिः–शेवधिः । (१०१) तरंग–भङ्गः तरङ्गः ऊर्मिः वीचिः । (१०२) हिम–नीहारः तुषारः तुहिनम् हिमम् प्रालेयम् मिहिका अवश्यायः । (१०३) बहु-प्रभूतम् प्रचुरम् प्राज्यम् बहुलम् बहु भूयिष्ठम् भूयः भूरि । (१०४) वसु–द्रव्यम्, वित्तम्, रिक्थम्, ऋक्थम् धनम् वसु द्रविणम् द्युम्नम् अर्थः राः विभवः । (१०५) केतुः–ध्वजः ।

III-23. (१०६) स्तेनः–चौरः स्तेनः दस्युः तस्करः मोषकः प्रतिरोधिः पाटच्चरः । (१०७) अश्रु-अस्त्रु, नेत्राम्बु, रोदनम् अस्त्रम्, अश्रु । (१०८) शुचि-शुक्ल. सित, पवित्र । (१०९) दारु-काष्ठम् । (११०) इन्धनम्, एधः (धस्) इध्मम्, समित् (fuel).

IV-24. (१११) जननी-जनयित्री, प्रसूः माता। (११२) भेकः-मण्डूकः वर्षाभूः शालूरः प्लवः, दर्दुरः। (११३) कौमुदी-चन्द्रिका ज्योत्स्ना। (११४) रजनी-शर्वरी निशा निशिथीनि रात्रि. त्रियामा क्षणदा क्षपा विभावरी तपस्विनी रजनो यामिनी तमी। (११५) महिषी कृताभिषेका नृपस्त्री, भोगिनी। (११६) पत्नी-पाणिगृहीती, द्वितीया सहधर्मिणी भार्या जाया दाराः। (११७) स्त्री-योषित् अबला नारी सीमन्तिनी वधूः, वामा वनिता महिला। स्त्रीणां भेदाः-अङ्गना-भीरुः कामिनी वामलोचना प्रमदा मानिनी कान्ता ललना नितम्बिनी सुन्दरी रमणी रामा। (११८) मन्दिरम्-(गृह) गृहम् गेहम् अवसथ वेश्म सद्म निकेतनम् निशान्तम् सदनम् भवनम् अगारम् मन्दिरम् निकाय्यः निलयः आलयः गृहाः (पुँ)। (११९) नदी-सरित् तरङ्गिणी शैवलिनी तटिनी ह्लादिनी धुनी स्त्रोतवती द्वीपवती स्रवन्ती निम्नगा आपगा। (१२०) वापी-दीर्घिका। (१२१) दासी-नीली, झिण्टी, बाणा आर्तगलः। (१२२) सखी-आलिः, वयस्या।

V-25. (१२३) सिंहः-मृगेन्द्रः पञ्चास्यः हर्यक्षः केसरी हरिः। (१२४) शिशुः-पोतः पाकः अर्भकः डिम्भः पृथकः शावकः शिशुः। (१२५) घृतम्-आज्यम् हविः सर्पिः।

VI-26. (१२६) रज्जु-शुल्बम् वराटकम् रज्जुः वटी गुणः। (१२७) सर्पः-पृदाकुः भुजगः भुजगः अहिः भुजङ्गमः विषधरः व्यालः काकोदरः फणी उरगः पन्नगः भोगी (गिन्)। (१२८) प्रातः-प्रगः प्रभातम्। (१२९) शयन-निद्रा स्वापः स्वप्नः संवेशः। (१३०) शिशिरः-म्-हेमन्तः शिशिरः-सुषीमः जडः तुषारः शीतलः शीतः हिमः।

VII-27. (१३१) राक्षस-कौणपः क्रव्यात्, क्रव्यादः, आशरः, रात्रिचरः निशाचरः कर्बुरः यातुधानः यातु (न) रक्षः (क्षस्) (१३२) उलूकः-वायसारातिः पेचकः। (१३३) पितृ-तातः जनकः पिता। (१३४) विधातृ-स्त्रष्टा, प्रजापतिः वेधाः विधाता बिश्वसृट् (ज्) विधिः। (१३५) पुत्रः-आत्मजः तनयः सूनुः सुतः। (१३६) स्वसा-भगिनी। (१३७) नप्त्री पौत्री। (१३८) दुहिता-पुत्री। (१३९) नप्ता (तृ)-पौत्र। (१४०) दम्पती-जंपती जायापती भार्यापती। (१४१) भ्राता-समानोदर्यः सोदर्यः सगर्भ्यः सहजः। (१४२) भिक्षुः-परिव्राट् कर्मन्दी पाराशरी मस्करी। (१४३) वेद-श्रुतिः आम्नायः त्रयी (यिन्)

VIII—28. (१४४) नील-कृष्ण असित श्याम काल श्यामल मेचक । (१४५) श्वेत-शुक्ल, शुभ्रः शुचि श्वेत विशद श्येत पाण्डर अवदात सित गौर वलक्ष धवल अर्जुन हरिण पाण्डुर पाण्डु । (१४६) पीत-गौर हरिद्राभ । (१४७) रक्त-लोहित रोहित । (१४८) हरित-पालाश हरित् । (१४९) पिङ्गल-कडार कपिल पिङ्ग पिशङ्ग कद्रु पिङ्गल । (१५०) चित्रम्-किर्मीर कल्माष शबल एत कर्बुर । (१५१) मृदु-सुकुमारम् कोमलम् मृदुलम् । (१५२) नवीन-प्रत्यग्र अभिनव, नव्य, नवीन नूतन नव नूत्न (१५३) पश्चाद्-अन्वक्-अन्वक्षम् अनुगम् अनुपदम् (Ind.) (१५४) प्रत्यक्षम्-ऐन्द्रियकम् । (१५५) पृथु-विशङ्कट बृहत् विशालम् विशाल पृथुल महत् वद्रम् उरु विपुल-इति विस्तीर्णस्य । (१५६) पीनम्-पीव स्थूल पीवर । (१५७) अल्प-स्तोक क्षुल्लकः । (१५८) सूक्ष्म-श्लक्ष्णम् दभ्रम् कृश तनु मात्रा त्रुटि लव लेश कण अणु । (१५९) बहु-प्रभूतम् प्रचुर प्राज्य अदभ्र बहुलम् बहु पुरुहूः पुरु भूयिष्ठः स्फारम् भूयः भूरि । (१६०) सर्वम्-समम् विश्वम् अशेषम् कृत्स्नम् समस्तम् निखिलम् अखिलम् निःशेषम् समग्रम् सकलम् पूर्णम् अखण्डम् अनूनकम् । (१६१) मयूरः-बर्हिणः बर्हि (हिन्) नीलकण्ठः भुजंगभुक् शिखावलः शिखी केकी । (१६२) अभिजातः-कुलजः कुलीनः (noble) बुधः ।

IX-29. (१६३) निदाघ-ग्रीष्मः उष्मकः उष्णोपगमः उष्णः ऊष्णागमः तपः । (१६४) वसन्तः-पुष्पसमयः सुरभिः । (१६५) प्रावृट्-वर्षा ॥ (१६६) शिशिरः-हेमन्तः । (१६७) नेता-स्वामी (मिन्), ईश्वरः, पतिः, ईशिता, अधिभूः पालकः नायकः नेता, प्रभुः परिवृढः अधिपः ।

Prose Lessons (1 to 9)

I. (१६८) मस्तकः-उत्तमाङ्गम्, शिरः शीर्षम् मूर्धा (र्धन्) (१६९) प्रत्यूषः-(षस्) अहर्मुखम् कल्यम् उषः प्रत्युषः प्रभातम् (१७०) बुद्धिः-मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः प्रेक्षा उपलब्धिः, चित् संवित् प्रतिपत्, ज्ञप्तिः चेतना । (१७१) बलम्-द्रविणम् तरः सहः शौर्यम् स्थाम् शुष्मम् शक्तिः पराक्रमः प्राणः । (१७२) समयः-कालः दिष्टः अनेहा । (१७३) प्राणी-चेतनः जन्मी, जन्तुः । जन्युः शरीरी (इन्)

II. (१७४) कोकिलः वनप्रियः परभृतः पिकः । (१७५) आम्रः-चूतः रसालः । (१७६) मञ्जरिः-वल्लरिः । (१७७) परुषम्-निष्ठुरम् । (१७८)

नीडम्—नीडः कुलायः (१७९) पक्षः-गरुत् छदः पत्रम् पतत्रम् तनूरुहम् ।

III. (१८०) वाटिका-आरामः उपवनम्-आक्रीडः । उद्यानम्-प्रमदवनम् (प्रमदाभिरन्यैर्वं सह क्रीडार्थम्) (१८१) लता-वल्ली, व्रततिः । (१८२) स्तम्बः-गुल्मः । (१८३) कलिका-कोरकः । (कुड्मलः मुकुलः-ईषद्विकसित) (१८४) पुष्परसः-मकरन्दः । (१८५) गुच्छकः-स्तबकः-गुच्छः (पुष्पादिस्तबके) (१८६) परागः-सुमनोरजः (पुष्परेणु) (१८७) सायं-दिनान्तः संध्या पितृप्रसूः । (१८८) जलाशयः-जलाधारः । ह्रदः-(अगाधजलम्) (१८९) अल्पसरः पल्वलम् वेशन्तः ।

IV. (१९०) सिंहासनम्-नृपासनम् भद्रासनम् । (राजासनस्य) (१९१) छत्रम्-आतपत्रम् । (१९२) गजः-दन्तो (इन्) दन्तावलः हस्ती, द्विरदः अनेकपः द्विपः मतङ्गः गजः नागः कुञ्जरः वारणः करी इभः स्तम्बेरथः पद्मी । (१९३) वेणुः-वंशः त्वक्सारः तृणध्वजः कोचकः मस्करः । (१९४) भल्लुकः-ऋक्षः अच्छभल्ल भल्लूकः । (१९५) मृगः-कुरङ्गः वातायुः हरिणः अजिनयोनिः । (१९६) अश्वः-घोटकः वीतिः तुरगः तुरङ्गमः वाजी वाहः अर्वा गन्धर्वः हयः सैन्धवः सप्तिः । (१९७) सेना-ध्वजिनी वाहिनी, अनीकिनी पृतना चमूः वरुथिनी बलम् सैन्यम् चक्रम् अनीकम् । (१९८) शोभा-कान्तिः द्युतिः छविः । (१९९) शंखः-कम्बुः । (२००) पशुः-श्वापदः ।

V. (२०१) अश्रु-नेत्राम्बु, रोदनम् अस्रम् अस्त्रु । (२०२) सचिवः-मन्त्री-प्रधानः सहायः सखा । (२०३) दर्पणः-मुकुरः आदर्शः । (२०४) कल्पवृक्षः-मन्दारः पारिजातकः संतानः हरिचन्द्रनम्-नः । (देवतरवः) (२०५) संपत्-संपत्तिः श्रीः लक्ष्मीः । (२०६) विपत्-विपत्तिः आपत् ।

VI. (२०७) वृकः- ईहामृगः कोकः । (२०८) कुक्कुरः-सारमेयः, मृगदंशकः, शुनकः भषकः श्वा कौलेयकः । (२०९) चर्म-अजिनम् कृत्तिः । (२१०) दैवम्-दिष्टम् भागधेयम् भाग्यम् नियतिः विधिः । (२११) पराक्रमः-शौर्यम्, सामर्थ्यम्, शक्तिः, बलम् प्राणः तरः । (२१२) शृङ्खला-अन्दुकः, निगडः ।

VII. (२१३) क्षेत्रम्-वप्रः केदारः । (२१४) मिथ्या-मृषा वितथम् । (२१५) यथार्थम्-यथातथम् । (२१६) सत्यम्-तथ्यम् ऋतम्, सम्यक् । (२१७) असत्यम्-अनृतम् वितथम् । (२१८) क्षेत्रपालः-कर्षकः कृषिकः

कृषीवलः क्षेत्राजीवः । (२१९) मेषः-मेढ्रः, उरभ्रः उरणः, ऊर्णायुः वृष्णिः एडकः । (sheep) (२२०) गर्दभः-रासभः खरः चक्रीवान् वालेयः ।

VIII. (२२१) लोहम्-अयः । (२२२) कोलाहलः-कलकलः । (२२३) शान्तिः-शम-शमथः । (२२४) यानम्-वाहनम् युग्यम् ।

IX. (२२५) मांसम्-पिशितम् तरसम् क्रव्यम् आमिषम् (२२६) मूर्खः-अज्ञः मूढः बालिशः यथाजातः वैधेयः । (२२७) विजयः-जयः (२२८) पराजितः-पराभूतः । (२२९) प्रतिबिम्बम्-प्रतिमानम् प्रतिमा प्रतिच्छाया प्रतिकृतिः प्रतियातना अर्चा प्रतिनिधिः । (२३०) खण्डम् शकलम् भित्तम् अर्धम् ।

Sandhis

(1) Make the Sandhis of the following words :—

(१) नृपः + जयति, रामः + अत्र, सः + अपि, शान्तः + रोषः, मधुरः + झकारः । (२) गजाः + इमे, कुमाराः + अत्र, नराः + एते, दृढाः + बन्धाः, कृताः घटाः । (३) रामः + आगतः, नलः इच्छति । (४) मुनिः + भजति, सप्तभिः + अश्वैः, वस्त्रैः + आवृत्तम्, नृपतेः + उद्यानम् । (५) पुनर् + रमते, गुरुर् + रुष्टः; पितर् + रक्ष । (६) पूर्णः + चन्द्रः, निः + चित्, बालः + गच्छति, नद्याः + तीरम्, रामः + टीकते पुरः + त्राता । (७) मत्तः + षट्पद गोपालः + रमते, मूर्खः + शिशुः । (८) भोः + बालाः, भोः + ईश्वरः, सः + विष्णुः, एषः + बटुः ।

(2) Separate the Sandhis of the following words :—

छात्रोऽयम्, नृपोऽस्ति, सोऽवदत्, योऽपि, निर्वाणोदीपः, उन्नतो नगः, अतीतो मासः । (२) निर्वाणा दीपाः, मृगा उपविशन्ति, उन्नता नगाः, नरा भीताः, छात्रा यतन्ते । (३) इत ऊर्ध्वम्, कन्दुक उत्पतति, वानर उत्पतति । (४) प्रभोरादेशः, गौरयम्, निर्धनः, बहिर्योगः, विधुर्लीयते । (५) माता रक्ष, अन्ताराष्ट्रियः, नीरोगः नेता रक्ष । (६) वायुश्चलति, तरोश्छाया, गजास्तिष्ठन्ति, नरस्तरति, बलीवर्दाश्चरन्ति, विष्णुष्टंकारः । (७) प्रथमस्सर्गः, बालस्स्वपिति, छात्रश्शाला, बालष्षट् । (८) भो देव, भो अजः, स सिंहः, एष गजः ।

Missing

Page 19 Note :—(3) When म् comes at the end of a word and is followed by a consonant, it is changed into Anuswara (ं).

पुंलिंग-शब्दाः ।

(अकारान्तः पुं. राम-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	रामः	रामौ	रामाः ।
द्वि.	रामम्	रामौ	रामान् ।
तृ.	रामेण	रामाभ्याम्	रामैः ।
च.	रामाय	रामाभ्याम्	रामेभ्यः ।
पं.	रामात्	रामाभ्याम्	रामेभ्यः ।
ष.	रामस्य	रामयोः	रामाणाम् ।
स.	रामे	रामयोः	रामेषु ।
सं.	हे राम	हे रामौ	हे रामाः ।

(इकारान्तः पुं. हरि-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	हरिः	हरी	हरयः ।
द्वि.	हरिम्	हरी	हरीन् ।
तृ.	हरिणा	हरिभ्याम्	हरिभिः ।
च.	हरये	हरिभ्याम्	हरिभ्यः ।
पं.	हरेः	हरिभ्याम्	हरिभ्यः ।
ष.	हरेः	हर्योः	हरीणाम् ।
स.	हरौ	हर्योः	हरिषु ।
सं.	हे हरे	हे हरी	हे हरयः ।

स्त्रीलिंग-शब्दाः ।

(आकारान्तः स्त्री. माला-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	माला	माले	मालाः ।
द्वि.	मालाम्	माले	मालाः ।
तृ.	मालया	मालाभ्याम्	मालाभिः ।
च.	मालायै	मालाभ्याम्	मालाभ्यः ।
पं.	मालायाः	मालाभ्याम्	मालाभ्यः ।
ष.	मालायाः	मालयोः	मालानाम् ।
स.	मालायाम्	मालयोः	मालासु ।
सं.	हे माले	हे माले	हे मालाः ।

(इकारान्तः स्त्री. मति-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	मतिः	मती	मतयः ।
द्वि.	मतिम्	मती	मतीः ।
तृ.	मत्या	मतिभ्याम्	मतिभिः ।
च.	मतये-मत्यै	मतिभ्याम्	मतिभ्यः ।
पं.	मतेः-मत्याः	मतिभ्याम्	मतिभ्यः ।
ष.	मतेः-मत्याः	मत्योः	मतीनाम् ।
स.	मतौ-मत्याम्	मत्योः	मतिषु ।
सं.	हे मते	हे मती	हे मतयः ।

(उकारान्तः पुं. गुरु-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	गुरुः	गुरू	गुरवः ।
द्वि.	गुरुम्	गुरू	गुरून् ।
तृ.	गुरुणा	गुरुभ्याम्	गुरुभिः ।
च.	गुरवे	गुरुभ्याम्	गुरुभ्यः ।
पं.	गुरोः	गुरुभ्याम्	गुरुभ्यः ।
ष.	गुरोः	गुर्वोः	गुरूणाम् ।
स.	गुरौ	गुर्वोः	गुरुषु ।
सं.	हे गुरो	हे गुरू	हे गुरवः ।

(उकारान्तः स्त्री. धेनु-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	धेनुः	धेनू	धेनवः ।
द्वि.	धेनुम्	धेनू	धेनूः ।
तृ.	धेन्वा	धेनुभ्याम्	धेनुभिः ।
च.	धेनवे-धेन्वै	धेनुभ्याम्	धेनुभ्यः ।
पं.	धेनोः-धेन्वाः	धेनुभ्याम्	धेनुभ्यः ।
ष.	धेनोः-धेन्वाः	धेन्वोः	धेनूनाम् ।
स.	धेनौ-धेन्वाम्	धेन्वोः	धेनुषु ।
सं.	हे धेनो	हे धेनू	हे धेनवः ।

(ऋकारान्तः पुं. नेतृ-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	नेता	नेतारौ	नेतारः ।
द्वि.	नेतारम्	नेतारौ	नेतॄन् ।
तृ.	नेत्रा	नेतृभ्याम्	नेतृभिः ।
च.	नेत्रे	नेतृभ्याम्	नेतृभ्यः ।
पं.	नेतुः	नेतृभ्याम्	नेतृभ्यः ।
ष.	नेतुः	नेत्रोः	नेतॄणाम् ।
स.	नेतरि	नेत्रोः	नेतृषु ।
सं.	हे नेतर्	हे नेतारौ	हे नेतारः ।

(ऋकारान्तः स्त्री. स्वसृ-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	स्वसा	स्वसारौ	स्वसारः ।
द्वि.	स्वसारम्	स्वसारौ	स्वसॄः ।
तृ.	स्वस्रा	स्वसृभ्याम्	स्वसृभिः ।
च.	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः ।
पं.	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः ।
ष.	स्वसुः	स्वस्रोः	स्वसॄणाम् ।
स.	स्वसरि	स्वस्रोः	स्वसृषु ।
सं.	हे स्वसर्	हे स्वसारौ	हे स्वसारः ।

(ऋकारान्तः पुं. पितृ-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	पिता	पितरौ	पितरः ।
द्वि.	पितरम्	पितरौ	पितॄन् ।
तृ.	पित्रा	पितृभ्याम्	पितृभिः ।
च.	पित्रे	पितृभ्याम्	पितृभ्यः ।
पं.	पितुः	पितृभ्याम्	पितृभ्यः ।
ष.	पितुः	पित्रोः	पितॄणाम् ।
स.	पितरि	पित्रोः	पितृषु ।
सं.	हे पितर्	हे पितरौ	हे पितरः ।

(ऋकारान्तः स्त्री. मातृ-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	माता	मातरौ	मातरः ।
द्वि.	मातरम्	मातरौ	मातॄः ।
तृ.	मात्रा	मातृभ्याम्	मातृभिः ।
च.	मात्रे	मातृभ्याम्	मातृभ्यः ।
पं.	मातुः	मातृभ्याम्	मातृभ्यः ।
ष.	मातुः	मात्रोः	मातॄणाम् ।
स.	मातरि	मात्रोः	मातृषु
सं.	हे मातर्	हे मातरौ	हे मातरः ।

नपुंसकलिंग शब्दाः

(इकारान्तः नपुं. वारि-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	वारि	वारिणी	वारीणि ।
द्वि.	वारि	वारिणी	वारीणि ।
तृ.	वारिणा	वारिभ्याम्	वारिभिः ।
च.	वारिणे	वारिभ्याम्	वारिभ्यः ।
पं.	वारिणः	वारिभ्याम्	वारिभ्यः ।
ष.	वारिणः	वारिणोः	वारीणाम् ।
स.	वारिणि	वारिणोः	वारिषु ।
सं.	हे वारि-वारे	हे वारिणी	हे वारीणि ।

(ईकारान्तः स्त्री. नदी-शब्दः)

वि.	ए. व.	द्वि. व.	ब. व.
प्र.	नदी	नद्यौ	नद्यः ।
द्वि.	नदीम्	नद्यौ	नदीः ।
तृ.	नद्या	नदीभ्याम्	नदीभिः ।
च.	नद्यै	नदीभ्याम्	नदीभ्यः ।
पं.	नद्याः	नदीभ्याम्	नदीभ्यः ।
ष.	नद्याः	नद्योः	नदीनाम् ।
स.	नद्याम्	नद्योः	नदीषु ।
सं.	हे नदि	हे नद्यौ	हे नद्यः

नपुंसकलिंग-शब्दः ।

(अकारान्त नपुं. वन-शब्दः)

	ए. व.	द्वि. व.	ब. व.
प्र.	वनम्	वने	वनानि ।
द्वि	वनम्	वने	वनानि ।
तृ.	वनेन	वनाभ्याम्	वनैः ।
च.	वनाय	वनाभ्याम्	वनेभ्यः ।
पं.	वनात्	वनाभ्याम्	वनेभ्यः ।
ष.	वनस्य	वनयोः	वनानाम् ।
स.	वने	वनयोः	वनेषु ।
सं.	हे वन	हे वने	हे वनानि ।

(उकारान्तः नपुं. मधु-शब्दः)

	ए. व.	द्वि. व.	ब. व.
प्र.	मधु	मधुनी	मधूनि ।
द्वि.	मधु	मधुनी	मधूनि ।
तृ.	मधुना	मधुभ्याम्	मधुभिः ।
च.	मधुने	मधुभ्याम्	मधुभ्यः ।
पं.	मधुनः	मधुभ्याम्	मधुभ्यः ।
स.	मधुनि	मधुनोः	मधूनाम् ।
सं.	हे मधु-मधो	हे मधुनी	हे मधूनि ।

(ऊकारान्त स्त्री. वधू-शब्दः)

ए. व.	द्वि. व.	ब. व.
वधूः	वध्वौ	वध्वः ।
वधूम्	वध्वौ	वधूः ।
वध्वा	वधूभ्याम्	वधूभिः ।
वध्वै	वधूभ्याम्	वधूभ्यः ।
वध्वाः	वधूभ्याम्	वधूभ्यः ।
वध्वाः	वध्वोः	वधूनाम् ।
वध्वाम्	वध्वोः	वधूषु ।
हे वधु	हे वध्वौ	हे वध्वः ।

(ऋकारान्तः नपुं. कर्तृ-शब्दः)

कर्तृ	कर्तृणी	कर्तॄणि ।
कर्तृ	कर्तृणी	कर्तॄणि ।
कर्तृणा	कर्तृभ्याम्	कर्तृभिः ।
कर्तृणे	कर्तृभ्याम्	कर्तृभ्यः ।
कर्तृणः	कर्तृभ्याम्	कर्तृभ्यः ।
कर्तृणः	कर्तृणोः	कर्तॄणाम् ।
कर्तृणि	कर्तृणोः	कर्तृषु ।
हे कर्तृ-कर्तर्	हे कर्तृणी	हे कर्तॄणि ।

Review of Revered Pandurang Shastrijee
Shreemad Bhagvad Geeta Pathshala, Madhavbag,
BOMBAY.

I have been very much pleased to go through and to observe both the parts of Subodh Sanskrit witten by Rasiklal Parikh. Inspite of the differences of opinions as to how Sanskrit Should be taught, I find the method of treatment of the said parts, is really of an extraordinary type. The treatment of the subject in this is of the latest method of teaching. The introduction of pictures for teaching new sanskrit words and grammatical forms will be really useful to make it simple and easy to understand for the students and the lovers of sanskrit language. The subjects chosen for the lessons are really on the modern lines and the varied exercises given at the end of every lesson will really be a good test of study to the students. The meanings of difficult words are given in different languages at the end of each lesson, will be much more useful to the persons knowing these languages and will facilitate the study of Sanskrit. The lessons in both the parts of the book are witten in a lucid and simple style. The construction of sentences is not only simple but interestiing, beautiful and appealing to the heart. Wherever there are friends of Sanskrit this book will be an asset. The Prose lessons of the book have been pleasant following the psychology of beginners and children. Hence I firmly believe that the study of of both the said parts will remove the prejudices against and dislke of the sanskrit language. Generally people believe that the grammar of the sanskrit language is difficult to understand but the syntax of grammar in the

said book will prove that it is not so and is able to create interest in the study of the same. In preparing this book, the evolutiou of the sequence (from easy to hard) of sanskrit grammar will enhance the knowledge of students and remove the defects of incomprehensibility in this book. There can be no two opinions on the point that the style of the preparation of the two parts of the book and the vividity in arrangement will enable all in gaining good knowledge of the said language.

I am sure that the number of persons who love and are interested in sanskrit language will increase greatly by the study of this book. I wish all suecess to the efforts made by the learned writer.

Shree Pandurang Shastri

1–2–71

— प्रतिज्ञा —

भारतो मम देशः। सर्वे भारतीयाः मम भ्रातरः भगिन्यश्च। मम देशे मे स्नेहः तस्यै पैतृकायै विविधायै समृद्धये च मे गर्वः। तदर्हो भवितुमहं सततं यतिष्ये। मम पितरौ गुरून् सर्वांश्च वृद्धानहं सन्मानयिष्यामि। सर्वान् च प्रत्यहं सादरमाचरयिष्यामि। स्वदेशे स्वबान्धवेषु च मे भक्तिर्भविष्यतीति मया प्रतिज्ञायते। तेषाम् हिते समृद्धौ चाहं सुखी भविष्यामि।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥